वर्षम् 72
अङ्कः -08
ज्येष्ठमासः
विक्रमाब्दः 2079
युगाब्दः 5124
जून, 2022


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



अष्टाङ्गैस्सम्भृतो योगो भारतस्याऽक्षयो निधिः। विश्वस्मिन्नपि विश्वेऽस्य मान्यता वर्ततेऽधुना।।
जूनमासेऽपि विश्वस्मिन् विश्वे योगः प्रवर्तते। एकविंशे दिनाङ्केऽस्य दिवसो विश्वमानितः।।

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | प्रसरतु मम राष्ट्रे सौरभं देववाण्याः | आचार्यः पं.नथमलशास्त्रीदाधीचः | ६ |
| ३ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ७ |
| ४ | गोपदेवीलीला | डॉ.अञ्जना शर्मा | ११ |
| ५ | श्रीराधामाधवनाटके भक्तिरसः | डॉ.सुरेन्द्रकुमारशर्मा | १८ |
| ६ | शकारस्य ग़ज़लगीतिः,वृन्दावनम् | डॉ. हर्षदेवमाधवः | २० |
| ७ | लघुकथा - कच्छपस्य चातुर्यम् | डॉ. नन्दिता सिंघवी | २१ |
| ८ | गोस्वामितुलसीदासस्य काव्यसिद्धान्तः | कर्मेन्द्रशर्मा | २२ |
| ९ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २५ |
| १० | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २६ |
| ११ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | २८ |
| १२ | संस्कृत-समाचाराः | | |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9799011085**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रवन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका


संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291



पत्रिकाप्रकाशनेऽधिगतमार्थिकं सौजन्यं राजस्थान-संस्कृत-अकादमीतः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -08
ज्येष्ठमासः
विक्रमाब्दः 2079
युगाब्दः 5124
जून, 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# योग आचर्यते विश्वे समादरदृशाऽधुना

...✍ प्रोफेसर श्रीकृष्णशर्मा

भारतवर्षस्य यशस्वी प्रधानमन्त्री **श्रीनरेन्द्रमोदी** 27.09.2014 तमे दिनाङ्के संयुक्तराष्ट्रमहासभायां स्वकीयसम्बोधनावसरे 'योग' विषयकम् उद्बोधनम् इत्थं प्रास्तौत् –

**'योगो' भारतस्य प्राचीनपरम्पराया एकोऽमूल्य उपहारः। काय-मनसौरैक्यस्यायं प्रतीकः। मानव-प्रकृत्योर्मध्ये सामञ्जस्यम् अयमुपस्थापयति। विचार-संयम-पूर्त्तिप्रदोऽयम्। स्वास्थ्यरक्षणायोपकारकरणाय च समग्रं दृष्टिकोणम् अयं प्रददाति। नायं व्यायामविषयकः, अपितु स्वात्मनि ऐक्यभावना-विषयकः, अथ च सम्पूर्णजगतः प्रकृतेश्चान्वेषण-परकः। परिवर्तनशीलायाम् अस्माकं जीवनशैल्याम् अयं चेतनास्वरूपम् अवधार्य जलवायुपरिवर्तनस्य समस्यां समाधातुं साहाय्यं कर्तुं शक्नोति। आगच्छन्तु, अन्तरराष्ट्रियं योगदिवसमेकम् अङ्गीकर्तुं सार्थकदिशायां प्रयासं विदधाम इति।**

11-12-2014 तमे दिनाङ्के संयुक्तराष्ट्रमहासभायां प्रस्तुतम् इमं प्रस्तावं 177 सदस्याः प्रतिवर्षं जूनमासस्य 21 तमे दिनाङ्के 'अन्तरराष्ट्रीययोगदिवस' इत्येवं रूपेण अभिनन्दयितुं योगदिवसं स्वीचक्रुः।

**प्रतिवर्षं जूनमासस्य 21 तमे दिनाङ्के** वर्षस्य बृहत्तमो दिवसो भवति, अतो दीर्घायुष्यकारको योगदिवसोऽपि तस्मिन्नेव दिनाङ्के निश्चित इति समीचीन एव। 21.06.2015 दिनाङ्के प्रथमोऽन्तर-राष्ट्रिययोगदिवसोऽभिनन्दित इति गर्वानुभूतिः।

योगशास्त्रम् अस्माकं भारतीयानाम् अमूल्यो निधिः। पतञ्जलिमुनिविरचितं **'योगदर्शनम्'** अष्टाङ्गयोगपुरस्सरं साङ्गोपाङ्गं **योगम्** उपवर्णयति।

कानि पुनर्योगस्य अष्टौ अङ्गानि? उच्यते। 'यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि' (यो.सू., 2.29)।

एषु अष्टाङ्गेषु धारणा-ध्यान-समाधयस्त्रीणि समाधेः साक्षाद् उपकारीणि भवन्ति, अतश्चैतानि अन्तरङ्गाणि। यमादयः पञ्च प्रतिपक्षभूतहिंसादि-वितर्कोन्मूलनद्वारेण समाधिमुपकुर्वन्ति, अतस्तानि बहिरङ्गाणि।

अत्रापि आसनादीनाम् उत्तरोत्तरम् उपकारकत्वं ज्ञेयम्। यथा आसनसिद्धौ सत्यां प्राणायामस्थैर्यं भवति, तेन च प्रत्याहारसिद्धिर्भवतीत्येवम् प्रकारेण ज्ञेयम्।

**अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहाः यमा** भवन्ति। तत्र प्राणवियोगप्रयोजनकव्यापारो **हिंसा** भवति, तदभावोऽ**हिंसा**। हिंसा सर्वानर्थहेतुः, अतः सर्वथा परिहार्य्यत्वात् तदभावरूपाहिंसाया प्रथमनिर्देशः। वाङ्मनसोर्यथार्थत्वं सत्यम्। परकीयपदार्थस्यापहरणं स्तेयं, तदभावोऽ**स्तेयम्**। गुप्तेन्द्रियस्योपस्थस्य संयमो **ब्रह्मचर्यम्**। भोगसाधना-

नामस्वीकरणम् **अपरिग्रहः**।

शौच-सन्तोष-तपः स्वाध्याय-ईश्वरप्रणिधानानि पञ्च **नियमाः** भवन्ति। शुचिता द्विविधा, बाह्याभ्यन्तरभेदात्। मृज्जलादिभिः कायादिप्रक्षालनं बाह्या शुचिः। मैत्र्यादिशुभाचरणैश्चित्तमलानां प्रक्षालनम् आभ्यन्तरशुचिः। सन्तोषस्तुष्टिः। चान्द्रायणादिव्रत-रूपधर्माचरणैः आत्मनैर्मल्यं **तपः**। मोक्षविद्या-विधायकवेदादिशास्त्राणाम् ओङ्कारपूर्वकमध्ययनं **स्वाध्यायः**। सर्वक्रियाणां फल-निरपेक्षभावपूर्वकं परमगुरौ ईश्वरे समर्पणम् **ईश्वर-प्रणिधानम्**। यम-नियमयोरपि यमसेवनपूर्वकं नियमसेवनं करणीयम्। यमास्तु नित्यमेव सेवनीयाः। अतश्चोक्तं मनुना -

**'यमान् सेवेत सततं न नित्यं नियमान् बुधः।**
**यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन्।।**

(मनु. 4/204)

अत्रायं विशेषः। **यमाः प्राधान्येन आत्मनः सम्बद्धानि** आचरणानि सन्ति, **नियमास्तु बाह्याचरणानि**। आस्यतेऽस्मिन्, आस्ते वा अनेन इति **आसनम्**। स्थिरसुखमासनम्, यथा-पद्मासनं, वीरासनमित्यादीनि। तस्मिन् आसनसिद्धौ सत्यां श्वास-प्रश्वासयोर्गतिविच्छेदः **प्राणायामः**। स च रेचक-पूरक-कुम्भकभेदात्त्रिविधः। प्राणायामैरेव चित्तसत्त्वगतं यदावरणं क्लेशरूपम्, तन्नश्यति। **प्रत्याहारो** नाम - इन्द्रियाणि स्वविषयेभ्यः प्रतीपम् आह्रियन्ते यत्र सः। अतश्चित्तनिरोधे तानीन्द्रियाणि निरुद्धानि भवन्ति। अत इन्द्रियाणां चित्तस्वरूपानुकार एव **प्रत्याहारः**।

नाभिचक्र-नासादौ चित्तस्य स्थिरीकरणं **धारणा** उच्यते। धारणासाध्यं ध्यानम्भवति। तच्च यत्र चित्तं धृतं तस्मिन् प्रदेशे ज्ञानस्य एकतानता = एकाग्रता = निरन्तरमुत्पत्तिरेव **ध्यानम्**। ततः समाधिः। सम्यग् आधीयते = एकाग्रीक्रियते विक्षेपान् परिहृत्य मनो यत्र, स **समाधिः**। न्यग्भूतज्ञानस्वरूपत्वेन अर्थमात्रनिर्भासं ध्यानमेव स्वरूपशून्यतामिव सम्पद्यते यत्र स **समाधि**रित्यर्थः।

धारणा-ध्यान-समाधिरित्येतत् त्रयम् एकस्मिन् एव विषये प्रवर्तमानं सत् **'संयम'** इति सञ्ज्ञया शास्त्रे व्यवह्रियते। तदेवम् संयमाभ्यासेन विवेकख्याति-स्वरूप- प्रज्ञायाः प्रकाशो भवति। प्रज्ञाप्रकाश एव प्रज्ञेयं साध्यं सम्यगवभासयतीत्यलम्।

पातञ्जलम् अष्टाङ्गयोगो राजयोगो, न तु हठयोगः। अतोऽत्र आसनं नास्ति शारीरिकव्यायामोऽपितु ध्यानावस्थायामुपवेशनस्य विधिः।

**- सम्पादकः**
**आचार्योऽध्यक्षचरश्च,**
**संस्कृतविभागः,**
**जयनारायणव्यासविश्वविद्यालयः,**
**जोधपुरम् ( राजस्थानम् )**
**दूरभाषाङ्कः 8386943655**

# प्रसरतु मम राष्ट्रे सौरभं देववाण्याः

❑ आचार्यः पं.नथमलशास्त्रीदाधीचः

उद्यानं भारतं भव्यं ग्रन्थपादपसंकुलम्।
सत्कविसिञ्चितं सेव्यं संस्कृतं मधुसौरभम्।।१।।

ओमित्येकाक्षरं ब्रह्मनादबिन्दुफलायुतम्।
वेदमूलं सदा सेव्यं संस्कृतेः ध्यानमंगलम्।।२।।

वेदाद्वेदेन वेदाय वेदवेद्यमजं विभुम्।
वेदं विद्यादधील्यादौ सेव्यं संस्कृत-सौरभम्।।३।।

धर्मदर्शनवेदाङ्गवेदान्तोपनिषद्गतम्।
सर्वशास्त्रशरीराणां प्राणवायुस्तु संस्कृतम्।।४।।

संस्कृतात्संस्कृतेनैव संस्कृताः संस्कृते सदा।
संस्कृतायैव जीवेम घ्रात्वा संस्कृत-सौरभम्।।५।।

जानन्ति वैयाकरणाः महान्तो
महेश्वरो वै मुदितस्त्रिनेत्रः।
स्रष्टुं पुरा व्याकरणं दयार्दो
ननाद ढक्कां नवपञ्चवारम्।।६।।

चतुर्दशैतानि हि शब्दशास्त्रमूलानि सूत्राणि शिवप्रदानि।
अध्येतुकामाः नितरां स्मरेयुः प्रवेष्टुकामाः खलु पाणिनीये।।७।।

सूत्राण्यइउणादीनि हलन्तानि चतुर्दश।
सर्वप्रत्ययमूलानि शोभन्ते स्वरव्यञ्जनैः।।८।।

पठ लिख वद बन्धो! देववाणीमनाद्यां
सकलभुवनभाषा-जन्मदात्रीं पुराणीम्।
ध्वनिगुणरससिक्तां शक्त्यलंकारयुक्तां
प्रसरतु मम राष्ट्रे सौरभं देववाण्याः।।९।।

संस्कारसद्भावपराः सुशीलाः
सुसंस्कृताः संस्कृतिधर्मनिष्ठाः।
जनाः सदाचाररताः स्वराष्ट्रे
तन्वन्तु ते संस्कृत-सौरभं तत्।।१०।।

विद्वद्भिः पाठकैः सेव्यं संस्कृतं मधुसौरभम्।
सारं सारं समुद्धृत्य पुष्पेभ्यः षट्पदो यथा।।११।।

।। देववाणीं नतोऽस्मि।।

- पूर्वप्राध्यापकः
छापर (चूरू)
मो. 9351226660

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ चतुर्थसर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

नीलोत्पलश्यामलकोमलाङ्गं
राधासमालिङ्गितचित्तचौरम्।
गोपाङ्गनाराधितगोकुलेशं
कृष्णम्भजामो यदुवंशनाथम्।।१।।

मित्रम्मुकुन्दम्मुरलीधरं तं
गोपालकृष्णं हृदि सन्निविष्टम्।
कुञ्जान्तरस्थाः मनसा स्मरन्तीः
गोपाङ्गनास्ताः निपुणम्परीक्ष्य।।२।।

सोऽचिन्तयद्यत्परमेशकृष्णः
गोपाङ्गनानाम्मनसि प्रविष्टः।
सर्वत्र चासां व्रजवल्लभानां
बुद्धौ च चित्ते रमतेऽधुना सः।।३।।

श्रीकृष्णभक्तासु सखीषु तासु
श्रीकृष्णमेव प्रभुमाविभान्तम्।
दृष्ट्वोद्धवस्तं व्रजगोपिकेशं
बद्धाञ्जलिस्सत्रमनञ्चकार।।४।।

गोपाङ्गनाराधितमाधवोऽसौ
सर्वज्ञकृष्णो मथुरानगर्याम्।
उद्विग्नचित्तं हतबुद्धिविद्यं
स्मृत्वोद्धवम्मन्दमहो जहास।।५।।

गोपाङ्गनाकोपभयातिभीतः
त्रस्तश्चिरं शान्तिमवाप्तुकामः।
शक्तिं व्रजस्योच्चनिनादवाचा
श्रीराधिकामुद्धव आजुहाव।।६।।

राधे! हि राधे! ध्वनयस्समन्तात्
कुञ्जे निकुञ्जे बहुगुञ्जयन्तः।
श्रीकृष्णसम्प्रेषितदूतकस्य
त्वार्तस्वरा राधिकया श्रुतास्ते।।७।।

राधेतिशब्दध्वनिमागतं तं
श्रुत्वा सखीभिस्सह भाषयन्ती।
लालित्यकारुण्यमयी किशोरी
राधा निकुञ्जाद् बहिराजगाम।।८।।

राधां सखीभिस्सह चर्चयन्ती-
माह्लादिनीं कृष्णमनोहरां ताम्।
पूर्णेन्दुसौन्दर्यसमग्रकान्तिं
दृष्ट्वोद्धवश्शान्तिमवाप्य तस्थौ।।९।।

कर्पूरगौरान्नवनीतवर्णां
श्वेताम्बुजास्यां घनकृष्णकेशाम्।
दृष्ट्वोद्धवस्तां वृषभानुकन्यां
विद्वान् गुणी निर्गुणतामवाप।।१०।।

कृष्णादभिन्नान्नवकृष्णरूपां
चन्द्राननां तां सुविशालनेत्राम्।
श्यामां किशोरीं सुविलोक्य वामां
ज्ञान्युद्धवो ज्ञानविहीनतामैत्।।११।।

तं स्तब्धचित्तम्परमम्प्रशान्तं
राधे हि राधे वचसा जपन्तम्।
राधां किशोरीं परितस्स्थितास्ताः
राधाष्टसख्यः प्रमुखा ह्यपश्यन्।।१२।।

श्रीकृष्णदूतं मुखकान्तिहीनं
प्रोचुस्तदानीं व्रजवल्लभास्ताः।
का तेऽस्ति चित्ते महती समस्या
किं जातमस्ति? स्मर राधिकेशम्।।१३।।

संसारभोगानपहाय विज्ञाः
वेदान्तविज्ञातसनातनं तम्।
वेदादिषट्शास्त्ररहस्यरूपं
श्रीवासुदेवं हि भजन्ति लोके।।१४।।

सम्पूर्णविश्वस्य परन्निधानं
लोकाभिरामं व्रजवल्लभेशम्।
सर्वत्र संव्याप्तमजं विभुं तं
श्रीकृष्णचन्द्रम्भज लोकनाथम्।।१५।।

संसाररागं पदलोभलिप्सां
विद्याभिमानं त्यज मोहमानम्।
वेदान्तविद्याफलतुल्यतत्त्वं
श्रीकृष्णरागम्भज भक्तिभावम्।।१६।

संसारबन्धान् सुखदुःखमिश्रान्
सम्बन्धिनस्स्वार्थपरायणांश्च।
सांसारिकांस्त्वं सुविहाय सर्वान्
भक्तौ मुरारेर्मनसा रमस्व।।१७।।

राधासखीनामुपदेशमेनं
श्रुत्वोद्धवोऽयं समवाप्तसंज्ञः।
नत्वा च राधां शरदिन्दुशोभां
श्रीकृष्णदूतः पुनरेवमाह।।१८।।

शृण्वन्तु सख्यो जगतो नराणां
वेदानुसारं शतवर्षमायुः।
समानभागेषु चतुर्षु सर्वं
शास्त्रानुसारं सुविभक्तमस्ति।।१९।।

विद्यार्जनं तत् प्रथमे विभागे
कृत्वा द्वितीये गृहिणो भवन्ति।
गच्छन्त्यरण्यं मनुजास्तृतीये
संन्यासिनो हि प्रभवन्ति तुर्ये।।२०।।

युष्माकमायुः प्रथमे विभागे
विद्यार्जनायाध्ययनाय वास्ति।
ग्राम्याः भवत्यस्सुकुमारिकास्तु
भ्रान्ताः कथं ह्यत्र भजन्ति कृष्णम्।।२१।।

यज्ञोपवीतम्परमम्पवित्रं
धृत्वा च यज्ञं विधिवद् विधाय।
प्रातश्च सायं समुपास्य सन्ध्यां
गायत्रिमन्त्रस्य जपं कुरुध्वम्।।२२।।

विद्यालयम्प्राप्य गुरोस्समीपं
गत्वा स्ववेदाध्ययनं कुरुध्वम्।
सम्प्राप्य तामार्यसमाजशिक्षां
नेयं ह्यवस्था भजनाय सख्यः।।२३।।

आरण्यकब्राह्मणवेदविद्यां
षट्शास्त्रवेदाङ्गपुराणविद्याम्।
वेदान्तवैशेषिकसांख्ययोगं
नव्यां च तां गौतमसूत्रविद्याम्।।२४।।

सम्प्राप्य सर्वा विदुषीभवन्तु
ब्रह्माश्रमादाश्रममन्यमेत्य।
सर्वा भवत्यः स्वकुलानुसारं
शीघ्रं गृहस्थाश्रममाविशन्तु।।२५।।

योग्यम्पतिम्प्राप्य कुलानुसारं
पत्या सहैवं ससुखं रमध्वम्।
शास्त्रानुसारं निजकर्म कृत्वा
कुर्वन्तु लोके हि समाजसेवाम्।।२६।।

कृत्वा समाजस्य च जन्मदात्रोः
सेवां च दायित्वमपि प्रभूतम्।
निर्वाह्य सर्वं करणीयमन्यद्
कर्मात्मना स्वच्छयशो लभन्ताम्।२७।।

संसारमोहं मनसि प्रविष्टं
त्यक्त्वा गृहस्थाश्रमकार्यभारम्।
तसु तपश्चेश्वरभक्तिमग्नाः
श्रेष्ठा नराः काननमाश्रयन्ति।।२८।।

मानापमानेषु समानभावाः
शीतोष्णवर्षातपमासहन्ते।
साक्षाद्धि नारायणतुल्यरूपाः
संन्यासमाश्रित्य नरा व्रजन्ति।।२९।।

किन्त्वत्र वेदोक्तविधानचक्रं
त्यक्त्वा भवत्यो हरिभक्तिलीनाः।
कस्याज्ञया प्रेरणया च बाल्ये
स्वच्छन्दभावेन वने वसन्ति।।३०।।

नैतद्धि लोकानुमतं न शास्त्रं
कस्यैचिदस्यानुमतिं ददाति।
कथम्भवत्यस्स्वमनोऽनुसारं
स्वातन्त्र्यमाश्रित्य वने भ्रमन्ति।।३१।।

वेदाविरुद्धञ्जगतोऽनुरूपं
कर्तव्यकर्माचरणम्प्रशस्यम्।
वेदाद् विरुद्धञ्च न लोकमान्यं
नित्यम्भवत्येव हि निन्दनीयम्।।३२।।

तस्मात्तदेवाचरणं विधेयं
यच्छास्त्रलोकोभयमान्यमस्ति।
सच्छास्त्रलोकोभयहीनपुंसां
कुत्रापि नैवास्ति गतिर्यशो वा।।३३।।

तं ज्ञानवन्तम्प्रभुकृष्णदूतं
श्रुत्वोद्धवम्प्राह सखीषु रम्या।
लालित्यवाचा ललिता मनोज्ञा
राधेङ्गिता श्याममनोहरा सा।।३४।।

वेदान्तवैशेषिकदर्शनाभ्यां
मीमांसया गौतमविद्यया वा।
सर्वैश्च वेदैःप्रभुरेव कृष्णः
विज्ञायते नास्ति विवादहेतुः।।३५।।

सर्वेषु लोकेषु सनातनं यद्
ब्रह्मास्ति संव्यासमनुप्रविष्टम्।
सैवास्ति कृष्णो नवनीतचौरो
गोवर्धनो गोकुलगोपिकेशः।।३६।।

उग्रैस्तपोभिर्बहुजन्मजातैः
जानन्ति ते नापि तपस्विनस्तम्।
स्नेहेन भक्त्या वयमत्र लोके
जानीमहे तम्प्रभुकृष्णचन्द्रम्।।३७।।

रागस्य रज्जौ हृदयेन बद्धाः
स्थित्वा च वृन्दाविपिने निकुञ्जे।
सख्यो हि सर्वा न वयं स्वतन्त्राः
तस्यैव कृष्णस्य वशे वसामः।।३८।।

प्रह्लादनामाच्युतभक्तिभावे
बाल्यात्प्रवृत्तःप्रभुबालभक्तः।
षण्मासकालावधिमात्रभक्तौ
बालध्रुवो ध्रौव्यगतिं समाप।।३९।।

व्यासात्मजो भागवतप्रवक्ता
ह्याजन्मनः प्रव्रजनं चकार।
व्यर्थम् प्रतीक्षा हरिभक्तिमार्गे
तुर्याश्रमस्य क्रियते मनुष्यैः।।४०।।

जीवात्मदेहस्य विनाशिनःकिं
ज्ञानं कदा प्राप्स्यति मृत्युमत्र।
आजन्मनोऽतो रमतां हि भक्तौ
राधेच्छया प्रोक्तवती विशाखा।।४१।।

वेदान्तविज्ञापितशुष्कतत्त्वं
ब्रह्मस्वरूपं गुणनामहीनम्।
व्यर्थं सदा तत्त्वमसीतिवेद्यं
कृष्णं विना केवलशून्यतत्त्वम्।।४२।।

मीमांसया कृष्णविहीनया वा
लाभश्च को गौतमविद्यया वा।
व्यर्थञ्च तद्व्याकरणं हि शुष्कं
व्यर्थश्च साहित्यरसो नटीनाम्।।४३।।

यावन्न बुद्धो हृदि सुद्धयुपास्यः
श्रीकृष्णचन्द्रो वसुदेवपुत्रः।
तावन्न शास्त्रागमतत्त्वसिद्धिः
राधाज्ञया प्राह च तुङ्गविद्या।।४४।।

सर्वाणि शास्त्राणि तमेव कृष्णं
सर्वे च वेदाःप्रतिपादयन्ति।
देवैश्च सर्वैः प्रभुरेव कृष्णः।
संस्तूयते बोध्यतयेव नित्यम्।।४५।।

ब्रह्मर्षिदेवर्षिमहर्षिसिद्धैः
गन्धर्वयक्षैस्सह किन्नरैस्सः
देवाधिदेवेन शिवेन साक्षा-
दाराध्यते सर्वत एव कृष्णः।।४६।।

कृष्णं विना जीवनमेव सर्वं
शुष्कं तथा नीरसमस्ति नूनम्।
तं श्यामदूतं हरिभक्तिहीनं
राधासखी प्रोक्तवती सुचित्रा।।४७।।

आजन्मनः कृष्णगुणानुवादे
भक्तौ रताः ये प्रभवन्ति लोके।
दैनन्दिनञ्जीवनमेव तेषां
सर्वं सदा सार्थकताम्प्रयाति।।४८।।

आजन्मतः कृष्णपरायणानां
येषां रतिः कृष्णपदारविन्दे।
तेषां सदा जीवनमेव धन्यं
दुःखं भयञ्चाशुविनाशमेति।।४९।।

धिग्जीवनं कृष्णरतेर्विहीनं
धिक्तन्मनो यद्विषये प्रयाति।
धिक्तञ्जनं यो भजते न कृष्णं
राधानुगा स्वाह च रङ्गदेवी।।५०।।

शास्त्राण्यधील्यापि च यो व्रजेशं
बालम्मुकुन्दम्प्रभुकृष्णचन्द्रम्।
जानाति नो तस्य निरर्थकं तद्
ज्ञानं प्रचण्डं तनुभारभूतम्।।५१।।

तस्मान्मुरारेश्शकटासुरारेः
संस्मृत्य संस्मृत्य पदारविन्दम्।
भक्तास्सदैवाश्रयमाश्रयन्ति
स्वस्यात्मनस्तम्परमात्मभक्त्या।।५२।।

भक्त्यैव सर्वाश्रयकृष्णचन्द्रं
ज्ञात्वा हृदा तं वयमाश्रयामः।।
राधासखीष्वन्यतमा सुदेवी
कृष्णप्रिया प्राह च कृष्णदूतम्।।५३।।

ये सर्वदा कृष्णचरित्रलीलां
स्मृत्वा रमन्ते प्रभुकृष्णभक्ताः।
वृन्दावने गुल्मलतानिकुञ्जे
धन्याश्च ते भारतभूविभागे।।५४।।

श्रीकृष्ण !गोबिन्द !हरे !मुरारे !
श्रीनाथ !नारायण !वासुदेव !
गोपीश ! गोवर्धन ! गोकुलेश !
राधेश ! दामोदर ! माधवेति।।५५।।

शब्दैस्सुभक्तैरुपगीयमानः
श्रीदेवकीनन्दनपूतनारिः।
सर्वत्र राराज्यत एव नित्यं
राधासखी चम्पलता समाह।।५६।।

गोपाङ्गनानां दृढकृष्णनिष्ठां
जन्मान्तरीयां बहुपुण्यलब्धाम्।
केनाप्युपायेन मृषाम्प्रकर्तुं
कश्चित् समर्थोऽस्ति न मृत्युलोके।।५७।।

तस्मात्त्वमुत्तिष्ठ विशिष्टविद्वन् !
गत्वा मुरारिं वद सर्ववार्ताम्।
गोपाङ्गनानां विरहाकुलानां
संतृप्तये माधव ! याहि शीघ्रम्।।५८।।

त्वद्दर्शनस्पर्शसुखं विनेमाः
गोपाङ्गना नैव गृहम्प्रयान्ति।
इत्युद्धवम्प्राह तमिन्दुलेखा
राधासखी तत्र वने कुमारी।।५९।।

श्रुत्वोत्तरं कृष्णसखस्तदानीं
व्रजाङ्गनानाम्परमोत्तमं तत्।
प्राप्तोपदेशोद्धटशास्त्रविद्वान्
ननाम राधाष्टसखीस्सहर्षम्।।६०।।

**********

**इति गोपाङ्गनावैभवम्महाकाव्यस्य चतुर्थसर्गः।**

**सह-आचार्यः**
**संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्**
**जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67**

# गोपदेवीलीला

❑ डॉ. अञ्जना शर्मा

पात्राणि –

» ललिता
» विशाखा
» राधा
» श्रीकृष्णः
» मधुमंगलः
» चन्द्रानना

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

**ललिता शुभदा लीला गोविन्दस्य श्रियेऽस्तु वः।**
**श्रुता स्मृता स्तुता ध्याता कीर्तिता सेविता मुदा।।**

सूत्रधारः – भगवतो गोविन्दस्य गोपदेवीलीला अत्रोपस्थितानां सर्वेषां कल्याणं करोतु।

नटी – (प्रविश्य) आर्य!'गोपदेवी' इति का लीला?

सूत्रधारः – त्वं न जानासि भगवान् गोविन्दः गोपीस्वरूपं धृत्वा वृषभानुभवनं याति।

नटी – अहो! अवगतम्, प्रेमाभक्तिलीलेयम्।

सूत्रधारः – सम्यक्। अद्य वयं 'गोपदेवीलीला' इति नामकम् एकाङ्करूपकं प्रयोक्तुम् उद्यताः।

नटी – बाढम्। मधुरम्।

सूत्रधारः – पश्य! राधायाः सख्यौ राधाभवनं प्रति गच्छतः। आवामप्यनुपदं गच्छावः।

नटी – आयातु चलावः।

(इति निष्क्रान्तौ)

स्थापना

## प्रथमं दृश्यम्

(श्रीवृषभानुमन्दिरे राधायाः द्वे मुख्यसख्यौ ललिता-विशाखे प्रविशतः।)

ललिता – (ससम्भ्रमम्) विशाखे! सत्वरं चल राधा प्रतीक्षते।

विशाखा – अयि! विलम्बो जातः अद्य तु घनः क्रीडां करोति। कदापि क्षीणत्वं समुपैति, कदापि मण्डलं संस्तभ्नाति।

(राधायाः भवनं प्रविश्य।)

विशाखा – सखि! राधे! राधे!

ललिता – राधे! कुत्र गता?

विशाखा – (वातायनं प्रति दृष्ट्वा) अहो! सा तु तत्र स्थिता। (समीपम् आगत्य) सखि! किं करोषि, मामपि न शृणोषि। अहो! घनश्यामं पश्यति।

ललिता – (सहासम्) – घनश्यामं पश्यति स्मरति वा।

विशाखा – (सोत्कण्ठम्) – सखि! त्वं घनश्यामं दृष्टवती?

ललिता – अद्य प्रातःकाले एव।

विशाखा – कीदृशं तस्य दर्शनम्?

ललिता – कथं वर्णयानि?

विशाखा – किम्?

ललिता – याभ्यां दृष्टः तयोस्तु वाणी एव न। नटवरनागरस्य कैशोरं वक्त्रारविन्दं सा मन्दस्मितश्रीः कारुण्यं लीलाकटाक्षाश्च। सत्यं दुर्लभमेव सर्वम्। (गायति)

हला हे! पश्य गोविन्दशोभां

बर्हापीडं नटवरवपुः
कनककपिशं वैजयन्तीं च मालाम् ।।
हला हे .........
कुञ्चितकेशं नेत्रकमलं
मृदुस्मितं प्रेमवीक्षणम् ।।
हला हे ........
विशालवक्षमाजानुबाहुम्
अधरसुशोभितवेणुम् ।।
हला हे ........
पद्मजार्चितं श्रीचरणपङ्कजं
परं जीवनसर्वस्वम् ।।
हला हे ........

विशाखा – अहो ! मधुरं मधुरं मधुरं सर्वम् ।

राधा – अयि ! यं वर्णयसि तस्य मनोहरं चित्रं लिखित्वा दर्शयाशु ।

(सख्यौ चित्रं लिखित्वा राधायै दत्तस्सत्वरम् ।)

राधा – (चित्रं करे प्रपश्यन्ती) अहो ! कदा मम भाग्योदयं भविष्यति, कदा श्रीगोविन्दकृपां प्राप्स्यामि, कदा श्रीचरणकमलं द्रक्ष्यामि –

हे देव ! हे दयित ! हे भुवनैकबन्धो !
हे कृष्ण ! हे चपल ! हे करुणैकसिन्धो !
हे नाथ ! हे रमण ! हे नयनाभिराम !
हा हा कदानुभवितासि पदं दृशोर्मे ।।

(इति कथयन्ती मूर्च्छिता)

ललिता – (सव्यथम्) – अयि ! इयन्तु मूर्च्छां समवाप (प्रतिबोधयति) अयि ! सोऽपि नित्यं गोचारणाय समायाति । त्वया प्रेक्षणीयः ।

विशाखा – (सान्त्वयन्ती) सखि ! कथं त्वं विह्वला मूर्च्छितातिव्यथां गता ? गोविन्दं यदीच्छसि तु तस्मिन् स्नेहं दृढं कुरु । स हरिः ।

(उत्थाप्य यत्नादथ चेतयित्वा)

ललिता – सखि ! धैर्यं धारय । सोऽवश्यमेव आगमिष्यति । अहं गोविन्दपार्श्वं गत्वा तव दशां निवेदयिष्यामि । विशाखे ! त्वं राधायाः समीपमेव तिष्ठ ! अहं गच्छामि

(ललिता श्रीकृष्णपार्श्वं गच्छति ।)

यवनिकापातः

## द्वितीयं दृश्यम्

(यमुनातटे नीपमवलम्ब्य श्रीकृष्णः चिन्तयति ।)

मधुमंगलः– (सकौतुकम्) – अये ! शीघ्रं चलतु किं चिन्तयसि त्वम् ?

श्रीकृष्णः – (सस्मितम्) किमपि न ।

मधुमंगलः – (सावरोषम्) मामपि न वदसि, स्वजनसमीपे गोपनात् मंगलं न ।

श्रीकृष्णः – (सप्रणयम्) प्रेमपदार्थविषये चिन्तयामि ।

मधुमंगलः – (साश्चर्यम्) प्रेमपदार्थः, कोऽयं पदार्थो मधुरोऽम्लो लवणस्तिक्तो वा ।

श्रीकृष्णः – अयि ! प्रज्ञ ! ईदृशःपदार्थो न ।

मधुमंगलः – (सोत्कण्ठम्) तर्हि कीदृशःपदार्थः ।

श्रीकृष्णः – स्वसुखवासनाशून्यो विचित्रपरमानन्द-माधुर्यपूरितोऽनिर्वचनीयः परमस्वतन्त्रस्य भगवतो वशीकरणे अद्वयो गाढोपायः ।

मधुमंगलः – कदा अयं संभवति ?

श्रीकृष्णः – समाहिते मनसि ।

मधुमंगलः –तत्संभवे किं भवति ?

श्रीकृष्णः – अन्तरंगं द्रवति, अथ च ।

मधुमंगलः – (सानन्दम्) अहो ! यथा मोदकेन ।

श्रीकृष्णः – (सहासम्) अयि ! भोजनभट्ट ! त्वं तु किमपि न जानासि ?

मधुमंगलः – न, न। मैवं वद, जानामि, त्वां जानामि, भोजनं जानामि, त्वं न जानासि अन्नं ब्रह्मेति।

श्रीकृष्णः – (हसन्) अरे! तदग्रे अपि जानीहि रसो वै सः।

मधुमंगलः – तव वार्ता मम मस्तिष्कोपरि उपरि एव परिभ्रमन्ति। रसः कः? अहं तु गोरसमेव जानामि। गोरसेन स्मरामि मम गां कुत्र मृगयामि। (परितः ससम्भ्रमेण पश्यन् चलति, किञ्चिद् दूरे पुरस्तात् आयान्तीं ललितां पश्यति।)

मधुमंगलः – (साश्चर्यम्, आत्मगतम्) असौ अत्र कथमायाति?

ललिता – (मधुमंगलं दृष्ट्वा) अये मधुमंगल! शृणोतु, शृणोतु। (समीपम् आगत्य) त्वं जानासि वद् गोपालः कुत्र वर्तते?

मधुमंगलः –भोः! किं त्वं वाग्व्यवहारमपि न जानासि?

ललिता – (सविस्मयम्) कथम्?

मधुमंगलः – त्वम् इति वदसि।

ललिता – (सावरोषम्) अथ किम्?

मधुमंगलः – ससम्मानेन वद, श्रीमन्तो धीमन्तो महामान्यास्स्वनामधन्याः मधुमंगलाचार्याः पञ्चवेदिनो महामहिमानः।

ललिता – (हसन्ती) अरे! सुविज्ञाः, वेदस्तु चत्वारस्तर्हि पञ्चवेदी कथम्?

मधुमंगलः – (साभिमानम्) ब्रह्मणे दत्ताः ये वेदास्तु चत्वारः एव किन्तु पञ्चमं मम दण्डमिदम्। दण्डमनुशासयति, निवारयति, धारयति, किं किन्न करोति, नमस्कुरु।

ललिता – (हसन्ती) आः, पण्डितम्मन्याः सम्प्रति तु वदतु गोपालः कुत्र?

मधुमंगलः – को गोपालः? अत्र तु गोपालाः एव।

ललिता – अरे! नन्दनन्दनो गोपालः।

मधुमंगलः – कथं पृच्छसि? किं प्रयोजनम्?

ललिता – आवश्यककार्यमस्ति।

मधुमंगलः – किं कार्यं, वद?

ललिता – तमेव कथयिष्यामि। सम्बद्धजनमेव वार्ता कथयितव्या।

मधुमंगलः – अयि! आवयोर्मध्ये को भेदः? स मया सह खादति क्रीडति भ्रमति च, मम प्राणसखा, संकोचं परित्यज्य वद।

ललिता – भेदः कथं न, जानासि तत्स्वरूपम्।

मधुमंगलः – किं स्वरूपम्?

ललिता – तेन पूतनावत्सबकाघासुराः हताः गिरिराजधारणं कालियनागमानमर्दनञ्च कृतम्। किं किमपूर्वं न कृतं, त्वया किं कृतम्, एका मूषिका अपि तु अद्यापि न हता।

मधुमंगलः – (सवितर्कम्) अरे! सा तु अस्माकमेव शक्तिः। तत्र तस्य का प्रभुता? सोऽस्माकमुच्छिष्टं खादति, अस्माभिस्सह क्रीडति पराजितः सन् अस्मान् स्वस्कन्धम् आरोहयति।

ललिता – आः! मैवं वद। स साक्षात् परात्परं परब्रह्म भगवान् भक्तवत्सलो दीनानाथः। आदरदानं तस्य प्रभुता।

मधुमंगलः – (सकोपम्) किं वदसि? स तु अस्माकं सखा एव।

ललिता – आः! अवगतम्। अधुना तु वद कुत्र वर्तते?

मधुमंगलः – (संकेतं कुर्वन्) तत्र कदम्बमूले स्थित्वा न जाने किं चिन्तयति?

ललिता – (हस्तौ सम्मेल्य) धन्यवादः।

(मधुमंगलः प्रस्थानं करोति, ललिता श्रीकृष्णपार्श्वं समायाति। श्रीकृष्णः पद्मनेत्रे सम्मील्य चिन्तनमुद्राया-मस्ति।)

ललिता – (सादरम्) हे हरे! श्रीचरणौ प्रणमामि।

श्रीकृष्णः – (पद्मनेत्रे उन्मील्य) अरे ललिते! त्वम् अत्र।

ललिता – (सविनयम्) हे नाथ! भवान् तु अन्तर्यामी, राधा भवद्विरहे अतिविकला सञ्जाता, दिशि दिशि रहसि भवन्तम् एव पश्यति। भवच्चरणदर्शनमेव परमोपायः।

श्रीकृष्णः – ललिते! सा तु मम स्वरूपशक्तिः, दुग्धशौक्ल्यवत् न मनाग् भेदः आवयोः।

जगति प्रेमप्रकाशनार्थमेव ईदृशी लीला। प्रेम मां बध्नाति। सन्त अहैतुकं प्रेमाश्रयन्ते। तान् तथैव भजाम्यहम्।

ललिता – (सानन्दम्) जयतु जयतु जयतु करुणाकरः, अवगतं यत् अचिरमेव मनोरथसिद्धिः भविष्यति।

श्रीकृष्णः – तथास्तु।

यवनिकापातः

## तृतीयं दृश्यम्

(वृषभानुमन्दिरे स्वभवने सखिभिस्सेव्यामाना राधा विराजते। ललिता प्रविशति।)

ललिता – (प्रसन्नमुखी) – अयि! सखि! राधे! राधे! (समीपम् आगत्य) चिन्ताकुला मा भव, त्वं सत्वरमेव हरिदर्शनं करिष्यसि।

राधा– (सहर्षम्) सत्यम्।

ललिता – नूनमेव। अयि! युवयोर्भेदरहितं तेजस्त्वेकमेव। तथापि भक्त्या तुष्यति हरिः। अतः निष्कारणं कर्म कुरु, येन परमया भक्त्या सति ते वाञ्छितं भूयात्।

राधा – (सोल्लासम्) अहो! अवश्यमेव।

(चन्द्राननां प्रति) अयि महामते चन्द्रानने! त्वया सर्वधर्मविन्महर्षिगर्गाचार्यमुखाद् धर्मशास्त्रं श्रुतं, त्वमेव श्रीकृष्णस्य प्रसन्नार्थं परं सौभाग्यवर्द्धनं महापुण्यं अभीष्टदं कस्यचित् पूजनं मह्यं ब्रूहि।

चन्द्रानना – (सुविचार्य) राधे! परं सौभाग्यदं वरप्रदं श्रीकृष्णस्यापि लब्ध्यर्थं तुलसीसेवनं मतम्।

राधा – (सविस्मयम्) कथम्?

चन्द्रानना – (सादरम्) कथमपि, दृष्टा स्पृष्टाऽथवा ध्याता कीर्तिता नामभिः स्तुता रोपिता सिञ्चिता नित्यं पूजिता तुलसी अभीष्टदा।

राधा – (साश्चर्यम्) अहो!

चन्द्रानना – शुभे! सर्वाणि तीर्थानि सर्वाः नद्यस्सर्वे देवतास्तुलसीदले तदा निवसन्ति। श्रीहरिचरणयोः अर्पितेन तुलसीदलेन चैकेन सर्वदा तत्फलं प्राप्यते यत्फलं सर्वपत्रेषु सर्वपुष्पेषु। तुलसी नृणां वाङ्मनः-कायसंचितं पापं दहते। तुलस्याः मंजरीकाष्ठविपिनदला-नामपि माहात्म्यमपूर्वम् सर्वमेतद् पापहरं पुण्यं कामदम्।

राधा – (सौत्सुक्यम्) कथम्? विस्तरेण ब्रूहि।

चन्द्रानना – यदि पापी तुलसीमञ्जरीयुक्तः प्राणान् विमुञ्चति तर्हि यमोऽपि नेक्षितुं शक्तः।

राधा – तुलसीकाष्ठेन किम्?

चन्द्रानना – यो नरस्तुलसीकाष्ठजं चन्दनं धारयेत् तद्देहः क्रियमाणं पापं न स्पृशेत्।

राधा – तुलसीविपिनेन।

चन्द्रानना – यस्य गृहे तुलसीविपिनम् अवतिष्ठति, तद्गृहं तीर्थरूपं, यत्र यत्र तुलसीविपिनच्छाया तत्र श्राद्धं प्रकर्त्तव्यं पितृणां दत्तमक्षयम्।

राधा – तुलसीदलेन।

चन्द्रानना – यस्तुलसीपत्रैः हरिं पूजयेत् स

पद्मपत्रमिवाम्भसा पापेन न लिप्यते। स तु हरिं तोषयति। त्वमपि नित्यं तुलसीसेवनं कुरु, येन सर्वदैव हि श्रीकृष्णो वशं याति। यथा हि -

**वृन्दायै तुलसीदेव्यै प्रियायै केशवस्य च।**
**कृष्णभक्तिप्रदे देवि! सत्यवत्यै नमो नमः।।**

राधा - (सानन्दम्) अहो! अवश्यमेव करिष्यामि।

यवनिकापातः

## चतुर्थं दृश्यम्

(उद्याने सखिभिस्सह राधा परिभ्रमति।)

ललिता - अयि! अद्य त्वं अतीव प्रसन्ना दृश्यते।

राधा - (सहर्षम्) सखि! भगवत्याः तुलस्याः कृपयैव।

ललिता - अहो! ज्ञातम्। भक्तिभावितहृदयेन पूजिता भगवती तुलसी तुभ्यम् अभीष्टवरं प्रदत्तवती।

राधा - (सौत्सुक्यम्) किन्तु कदा एवं भविष्यति?

ललिता - धैर्यं धारय। दैववचनं नैव निष्फलम्।

(तदैव गीतं गायन्ती एका गोपदेवी आयाति।)

गोपदेवी - (गायति)

**हा हन्त किं करवाणि न पश्यामि हरेर्मुखम्**
**गतो यामो गतौ यामौ गता यामा गतं दिनम्।**
**तृष्यति वर्षन्नेत्रद्वयं**
**ज्वलति वर्षणे मे हृदयं**
**क्व गच्छामि क्व तिष्ठामि न जानामि अहर्निशम्।।**
**हा हन्त ....**
**भ्रमति विकलयति मे चित्तं**
**शून्यमिव मे जगत्सर्वं**
**यत्र तत्र सर्वत्र सर्वदा मृगयामि मे प्राणधनम्।।**
**हा हन्त .....**
**कथं धारेयं वद धैर्यम्**
**अहो स्मर हरिवचनं**
**यथा भक्तस्तथैव तान् भजाम्यहं निःसंशयम्।।**
**हा हन्त .....**

राधा - (सकुतूहलम्) ललिते! श्रुतं त्वयेदम्।

ललिता - (सविस्मयम्) अहो अश्रुतं श्रुतम्।

गोपदेवी - (राधासमीपमागत्य) नमस्करोमि देवि!

(सख्यः अनिमिषैरक्षिभिः तस्य रूपं वीक्षन्ते।)

ललिता - अपूर्वम्।

विशाखा - सकलेन्द्रियाणां दृक्त्वं भवेत्।

गोपदेवी - (स्वगतम्) कथमेवं माम् एताः वीक्षन्ते? किं सम्यग्रूपेण मया गोपीवेशो न धृतः? प्रीतिपरीक्षार्थम् आगतस्य मम कृष्णस्य एव कदाचित् परीक्षा न भवेत्, सावधानम्। (प्रकाशरूपेण)

महाभागे! नमस्करोम्यहं। भवत्याः दर्शनार्थं समायातास्मि।

राधा - (सादरम्) सखि! अहमपि, स्वागतं ते।

(दोर्भ्यां परिरभ्य, आसने संस्थाप्य जलादिकं समर्प्य) सखि! किं नामधेयं तव।

गोपदेवी - शुभे! नन्दनगरनिवासिनी गोपदेवीति विख्यातास्मि।

राधा - (सानन्दम्) अहो! नन्दनगरनिवासिनी। तव स्वतः आगतया भूरिभाग्यमस्ति मम। सुभगे! स्वागमनस्य हेतुं विस्तरशो वद, यदद्य मम योग्यं कार्यं तद् ब्रूहि।

गोपदेवी - हे चंचलापाङ्गे! मृगलोचने! त्वद्रूपगुणमाधुर्यं मया श्रुतं, दर्शनस्य बलवती इच्छा मन्मनसि जाता तस्मात् भवद्दर्शनार्थं दूरदेशात् समायातास्मि।

राधा - हे देवि! नन्दनगरनिवासिन्यसि, वर्णोऽपि ते मत्प्रियतमनन्दात्मजसदृश एव भाति इति त्वमपि मम प्रियैवासि।

ललिता - (हसन्ती) प्रियस्य सर्वमपि प्रियम्।

राधा – अत्र कस्संदेहः।

(श्रुत्वैव गोपदेवी विमना जाता।)

राधा – सखि! मद्वचनं श्रुत्वा त्वं किं विमना जाता।

गोपदेवी – अयि! किं कुटिलतमं धूर्तं नन्दात्मजं स्वप्रियतमं मन्यसे?

राधा – अरे! स न केवलं ममैव प्रियतमोऽपितु प्राणिमात्रस्य स प्रियोऽस्ति।

गोपदेवी – कथम्?

राधा – सर्वेषामपि भूतानां स्वात्मैव प्रियतमः, कृष्णोऽखिलात्मनाम् आत्मा।

गोपदेवी – भोः! वञ्चितासि त्वम्। प्रियस्तु परमात्मा एव, स किं परमात्मा?

राधा – निस्संदेहः, स जगदात्मा सर्वेश्वरः एव।

गोपदेवी – केनापि त्वमसि भ्रामितासि। यदि स सर्वेश्वरः तर्हि वने वने पादुकाहीनो गोचारणं कथं करोति। नैवं करोति सर्वेश्वरः, तत्सेवकाः एव।

राधा – अनेन तु तस्य प्रभुता वृद्धिमाप्नोति, न्यूनता कथम्?

गोपदेवी – अपि ननु स्वयमेव त्वं विचारय श्रुतसंपन्नाऽसि। स चौर्यकर्म करोति, गृहे–गृहे नवनीतं चोरयति, वर्जने भाण्डं भिनत्ति, वत्सान् मुञ्चति, बालकान् रोदयति। किं किन्न करोति?

राधा – सर्वमेवं तु स प्रेम्णा करोति।

गोपदेवी – सखि! त्वं तु अतिसरला। अये –

**जात्या स गोपः किल कृष्णवर्णो-**
**ऽधनी न वीरो नहि शीलरूपः।**
**यस्मिंस्त्वया प्रेम कृतं सुशीले**
**त्यजाशु निर्मोहिनमद्य कृष्णम्।।**

राधा – रे दुर्विनीते। त्वं प्रियतमं कृष्णं निन्दयसि अतस्सर्वथा त्यजनीया, तथापि न जाने कथं माम् अनुरञ्जयति? त्वं परिपूर्णदेवम् आदिपुरुषं कृष्णं न जानासि। जनानाम् आर्तिहरणाय भूभूरिभारहरणाय सतां शुभाय च तस्यावतारः,

**यत्प्राप्तये विधिहरप्रमुखास्तपन्ति**
**वह्नौ तपः परमया निजयोगरीत्या।**
**दत्तः शुकः कपिल आसुरिरङ्गिरा यत्**
**पादारविन्दमकरन्दरजः स्पृशन्ति।।**

गोपदेवी – कल्याणि! भवती विचारयतु स जात्या गोपः।

राधा – भुवि गोपजातेः परा न जातिः। गोपाः गाः पालयन्ति। रजसो स्पृशन्ति, सुनाम जपन्त्यहर्निशमलं सुमुखं गवाक्ष प्रेक्षन्ते।

गोपदेवी – मनोहरे! स वर्णेन कृष्णः।

राधा – तत्कृष्णवर्णशोभा तु अपूर्वा, तल्लग्नमग्नमनसा स्वसुखं विहाय नीलकण्ठ उन्मत्तवद् व्रजे धावति।

गोपदेवी – स निर्धनः।

राधा – अरे स्वर्लोकसिद्धमुनियक्षमरुद्गणानां पालः समस्तनरकिन्नरनागनाथाः भक्त्या यत्पादपद्ममनिशं प्रणिपत्य लब्धश्रियः तस्मै बलिं प्रददुः, स निर्धनः कथम्।

गोपदेवी – स वीरो न।

राधा – पूतनावत्सशकटबकाघासुराणां वधस्तस्य वीरतायाः परिचायको न। सत्यमेव, तस्य मुरारेः किमुत यशः? सोऽनन्तकोटिब्रह्माण्डनायकः। तस्य भ्रकुटिविलासेनैव सृष्टिः संहारश्च। भक्तात् प्रियो न कोऽपि विदितः पुरुषोत्तमस्य। स तु भक्ताननुव्रजति, भक्तिनिबद्धचित्तस्य सकललोकजनस्य चूडामणिः।

**गच्छन् निजं जनमनुप्रपुनाति लोका-**
**नावेदयन् हरिजने स्वरुचिं महात्मा।**

**तस्मादतीव भजतां भगवान् मुकुन्दो**
**मुक्तिं ददाति न कदापि सुभक्तियोगम्।।**

गोपदेवी – राधे! त्वदीयभिषणो भिषणं हसन्ती मां निरुत्तरयति। किन्तु अहं तव वचनं सत्यं तदा हि मन्ये, यदा हरिः अत्रागमिष्यति।

राधा – अवश्यमेव वनमालिनः आगमो भविष्यति।

(अथ समुत्थाय उपविश्यासने उत्कण्ठिता भावविह्वला मीलितलोचना सा प्रार्थयति।)

**एहि हरे! हे हरे मुरारे!**
**दीनबन्धो! प्रणतजनबन्धो**
**नवजलधररुचिरविग्रहं**
**कमलकोमललोलविलोचनं**
**त्वामिह याचे दर्शनदानं**
**हे मधुसूदन! आनन्दकन्द!**
**एहि हरे! ......**
**चरणपङ्कजं प्रणतकामदं**
**पापकर्शनं शोकनाशनं**
**त्वामिह याचे चरणशरणं**
**हे केशव! माधवमुकुन्द!**
**एहि हरे! ......**
**अकारणकरुणावरुणालयं**
**कृपाकरं तापत्रयहारिणं**
**त्वामिह याचे कृपावर्षणं**
**हे गोविन्द! करुणासिन्धो!**
**एहि हरे! ......**

प्रार्थनायां दध्यौ ध्यानस्तिमितलोचनां वाष्पकण्ठीं अश्रुपूर्णमुखीं तां वीक्ष्य भक्तवत्सलः श्रीकृष्णः गोपीवेशं त्यक्त्वा स्वां पौरुषीं तनुं बिभ्रत् प्राह)

श्रीकृष्णः – राधे! ब्रजसुन्दरीशे। नेत्रमुन्मील्य पश्य समागतं माम्? 'एहि' इति श्रुतं ते निजगोकुलगोपवृन्दं सद्यो विसृज्य वंशीवटाद् यमुनानिकटात् प्रधावं त्वत्प्रीतये अत्र समागतः।

(नेत्रमुन्मील्य हरिं दृष्ट्वा राधा परां मुदमाप।)

राधा – (सहर्षम्, आसनादुत्थाय) वन्दनम् अभिनन्दनं नाथ!

(चकितदृष्ट्या यत्र-तत्र पश्यन्ती कथयति) सा देवी कुत्र गता?

श्रीकृष्णः – (हसन्) प्रिये! मय्यागते सति सखिरूपिणी का, यक्षासुरी किमु नरी किल किन्नरी वा गता। भवतीं छलयितुं मायावती सा आगता। तस्माद् विश्वास एव न निधेय उरङ्गपत्न्याम्।

ललिता – (सहासम्) सखि! अयमेव सा देवी।

राधा – (लीलामवगम्य सानन्दम्) जयतु जयतु लीलाधरः।

सख्यः – (विहस्य) जयतु जयतु जयतु भक्तवत्सलः।

(आनन्दिताः ललिताविशाखादयः सख्यः राधागोविन्दम् अर्चयन्ति जयघोषं कुर्वन्ति च।)

(भरतवाक्यम्।)

**गोपदेवी परा लीला गोविन्दस्य श्रियेऽस्तु वः।**
**गोप्यामहैतुकीं दत्त्वा प्रेमाभक्तिं सुदुर्लभाम्।।**

(निष्क्रान्ताः सर्वे।)

गोपदेवीलीला सम्पन्ना।

**एसोसिएट प्रोफेसर**
**संस्कृत, दर्शन एवं वैदिक अध्ययन विभागः**
**वनस्थली विद्यापीठम्, राजस्थानम्**

# श्रीराधामाधवनाटके भक्तिरसः

❑ डॉ.सुरेन्द्रकुमारशर्मा

श्रीराघवेन्द्रकविना खिस्तस्य अष्टादशशताब्दौ राधामाधवनाटकस्य रचना कृता। श्रीराघवेन्द्रकविः ब्रजभूमौ जनिं लब्धवान्। एषः राधावल्लभसम्प्रदायस्य अनुयायी आसीत्। नाटकमिदम् अधुनापर्यन्तं पाण्डुलिपिरूपेण एव उपलभ्यते। राधाकृष्णयोः लीलाः आश्रित्य लिखिते अस्मिन् नाटके भक्तिरस एव अंगी रसः अस्ति। मानवहृदये रतिहासशोकक्रोधोत्साहभयजु-गुप्साविस्मयादिभावाः सुप्तावस्थायां संस्काररूपेण स्थिताः भवन्ति। अतएव स्थायिभावाः कथ्यन्ते। कारणस्य योगेन एते भावाः यदा उद्बुद्धाः भवन्ति तदा काव्येषु रससंज्ञां लभन्ते। अस्मिन् विषये भरतमुनेः रससूत्रं प्रसिद्धम् -

''विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। अष्टौ स्थायिभावाः अतएव अष्टौ रसाः भवन्ति। केचन विद्वांसः मम्मटादयः शान्तं नवमरसरूपेण स्वीकुर्वन्ति। केचन वात्सल्यं दशमरसरूपेण स्वीकुर्वन्ति। केचन च भक्तिमपि पृथग् रसरूपेण स्वीकुर्वन्ति।

शृङ्गारः मुख्यरसः वर्तते तस्य स्थायिभावः रतिः अस्ति। काव्येषु रतिभावस्य आलम्बनं यदा नायकनायिकादयः भवन्ति तदा शृंगारस्य निष्पत्तिः भवति। अयं रतिभावः यदा महान्तं प्रति भवति तदा अयं भावः भक्तिः इति कथ्यते। पितरं प्रति पितृभक्तिः, मातरं प्रति मातृभक्तिः, भ्रातरं प्रति भ्रातृभक्तिः, राजानं प्रति राजभक्तिः, साधुं प्रति साधुभक्तिः, गुरुं प्रति गुरुभक्तिः, भगवन्तं प्रति भगवद्भक्तिःकिं वा ईश्वरभक्तिः इति नाम्ना कथ्यते। अयं रतिभावः यदा लघुं प्रति भवति तदा वात्सल्यं, स्नेहः, ममता, कृपा इत्यादीनि अस्य नामानि भवन्ति। समवयस्कं प्रति रतिभावः मैत्री इति कथ्यते। काव्येषु शब्दार्थयोः माध्यमेन नाट्येषु च अभिनयमाध्यमेन यदा एषा भक्तिः प्रकटीभवति तदा भक्तिरसः कथ्यते महर्षिशांडिल्यः भक्त्याः लक्षणं प्रतिपादयन् शांडिल्यभक्तिसूत्रे कथयति **'सा परानुरक्तिरीश्वरे भक्तिः।'**

देवर्षिनारदेनापि नारदभक्तिसूत्रे भक्त्याः लक्षणं प्रदत्तम्-

**'सा त्वस्मिन् परमप्रेमरूपा अमृतस्वरूपा च।'**

एवमेव मधुसूदनसरस्वती अपि भक्त्याः लक्षणं प्रतिपादयति -

**'द्रवीभावपूर्विका मनसो भगवदाकारता रूपसविकल्पवृत्तिर्भक्तिः।'**

केचन वदन्ति- 'भगवति मनःस्थिरीकरणं भक्तिः। '' अथवा' पूज्येष्वनुरागो भक्तिः।

मध्ययुगीनवैष्णवभक्तिसम्प्रदायेषु वृन्दावनस्य सुविख्यातः राधावल्लभसम्प्रदायः स्वकीयं विशिष्टं स्थानं भजते। श्रीहितहरिवंशगोस्वामी प्रायशः पञ्चशतवर्षपूर्वं वृन्दावने भक्तिमार्गस्य नवोन्मेषं कृतवान्। कर्मकाण्डस्य विधिविधानात् भक्ताय मुक्तिं प्रदाय माधुर्यभावेन रसभक्त्याः आनन्दप्रदः नूतनमार्गः दर्शितः अनेन। राधावल्लभसम्प्रदाये राधास्मरणाय कस्यचित् मानसिकानुष्ठानस्य विधानम् अस्ति। नित्यविहारः रसभक्त्याः प्रतिष्ठायां प्रथमः सहायकः भवति। श्रीकृष्णः, श्रीराधा, वृन्दावनधाम, सख्यश्च समवेतरूपेण नित्यविहारस्य अनिवार्याङ्गानि मन्यन्ते। नित्यविहार-मूलायाः रसभक्त्याः आविर्भावकः गोस्वामी श्रीहितहरिवंशः स्वीक्रियते।

राधावल्लभसम्प्रदायस्य रसभक्तिधारायाम् एव अग्रे राधामाधवनाटकस्य लेखकः श्रीराघवेन्द्रकविः जनिं

प्राप्तवान्। यद्यपि नाट्यशास्त्रीयपरम्परानुसारेण संस्कृतनाटकेषु शृङ्गारः वीरो वा मुख्यः(अङ्गी) रसः भवति अन्ये रसाः गौणाः भवन्ति किन्तु राधामाधवनाटके भक्तिरसः अंगीरसः वर्तते। कानिचन उदाहरणानि द्रष्टव्यानि।

राधायाः सखिः श्यामला कथयति-

**उन्मीलत्पुलकांकुरोऽधरदलो हस्तोल्लसत्कंदलो,**
**मन्दस्मेरमुखारविन्दकुसुमः कंदर्पकन्दोपमः।**
**कोऽयं श्याममनोहरं मुरलिका भृङ्गी कलोलंगम,**
**श्रीवृन्दावनसद्मनि प्रविलसत्यानन्दकल्पद्रुमः।।**
-(1/25)

अपि च-

**वृन्दारण्यपुरन्दरः सहचरः कन्दर्पदर्पादरः,**
**चञ्चच्चन्द्रकशेखरः स्मरभरादोऽलम्बितम्बाभवः।**
**मुग्धस्मेरसुधारसालमुरलीरत्नाभिरामोऽधरो,**
**राधायाः कुचकुम्भनिर्भरपरीरम्भाय सम्भाव्यते।।**
(1/26)

**श्रीकृष्णः गोकुलस्य चन्द्रमा,**
**राधा च नवमणिसदृशा।**
**चन्द्रिकायां मार्गवत् श्रीकृष्णस्य**
**सान्निध्ये राधा अपि चकासते।**

श्रीकृष्णः स्वं प्रति राधायाः अनुरागम् अनेन प्रकारेण प्रकटयति-

**सम्फुल्लगण्डस्थलमण्डलेन,**
**लोलेन नीलोत्पललोचनेन।**
**सस्मेरशोणाधरपल्लवेन,**
**ज्ञातोऽनुरागो मयि राधिकायाः** (2/14)

अपि च-

**कंदर्पकेलिजनकेन मनोहरेण,**
**वक्रेण चन्द्ररुचिरेण सलज्जितेन।**
**साकूतमन्दहसितेन विलोकितेन,**
**न्यस्तोऽनया मयि मनोजभवोऽनुरागः** (2/15)

**न स्नाने न च भोजने न च वने नालापने नांजने,**
**ना गाने न च नृत्यगीतकलने नो वा मनो याति मे।**
**जातः किं तु जडांधमूकबधिरप्रायोऽस्मि तावत्सखे,**
**यावत्कर्णतटीयमाविशदहो राधेतिनामामृतम्** (3/6)

अपि च -

**स्थायं स्थायं नवतरुतले वेणुमाधाय वक्त्रे,**
**पायं पायं मधुरमधुरं पुष्पमध्वीकसारम्।**
**स्मार्यं स्मार्यं स्मररसमयं राधिकानामधेयं,**
**गायं गायं जयति जगतां मंगलं मे सखायम्** (3/1)

**विस्मारिका विजयते सुरकामिनीनाम्,**
**अध्यापिका पिकवधूमधुरध्वनीनाम्।**
**निःसारिका विजयते गुरुगंजनानां,**
**विस्मायिका मुरलिका व्रजसुन्दरीणाम्** (7/2)

भक्तिमाध्यमेन भक्तजनानां मनोविनोदः स्वसिद्धान्तानां शिक्षा च अस्य नाटकस्य मुख्यम् उद्देश्यं वर्तते। राधाकृष्णयोः भक्ताः सदैव तयोः सान्निध्यमेव इच्छन्ति मुक्तिमपि न। अनेन प्रकारेण राधामाधवनाटके श्रीकृष्णस्य शृङ्गारलीलानां भक्तिपूर्णं चित्रणं कृतम् अस्ति। अतएव भक्ति एव अङ्गीरसः अस्ति। सर्वाणि पात्राणि राधावल्लभ सम्प्रदायस्य सिद्धान्तानां प्रचारमेव कुर्वन्ति। राधावल्लभसम्प्रदायस्य रसभक्तेः स्थापना एव नाटकस्य मुख्यम् उद्देश्यम् अस्ति। अत्र भक्तिरसस्य आलम्बनं श्रीराधा श्रीकृष्णश्च स्तः, उद्दीपनं वृन्दावनं निकुंजं, प्रासादं च सन्ति। अनुभावाः भगवन्नाम्नः कीर्तनम्, अनुरागः मोहनाशश्च सन्ति। व्यभिचारिभावाः हर्षः मतिः, वितर्क इत्यादयः सन्ति।

- प्राचार्यः
हंसस्नातकोत्तरमहाविद्यालयः
कोटपूतली, जयपुरम्

# शकारस्य ग़ज़लगीतिः

( सवैयाच्छन्दोलये )

# वृन्दावनम्

( आध्यात्मिकग़ज़लगीतिः )

❑ डॉ.हर्षदेवमाधवः

धावशि याशि च शभयं श्वशिषि च कुत्र गमिष्यशि वशन्तशेणे!
मुक्तमयूरी त्वं यमराजं श्वयं वरिष्यशि वशन्तशेणे।।

श्वा इव हरिणीं त्वां च कपोतीं बिडाल इव गृह्णामि शवेगम्।
अवले! हरामि शीघ्रमवशिके किं नु करिष्यशि वशन्तशेणे।।

अश्रिह्यत् कुन्त्यां कंशो वा रामो द्रौपद्यामश्रिह्यत्।
तथैव श्रिह्यो मधुरान् शब्दान् त्वमपि वदिष्यशि वशन्तशेणे।।

वर्धयन्ती कामं मे मदनं कथं मन्मथं विवर्धयन्ती।
गच्छशि भयभीता त्वं नूनं प्रिया भविश्यशि वशन्तशेणे।।

तिमिरं खादति ग्रशति च तिमिरं निगलति तिमिरं भुङ्क्ते तिमिरम्।
नष्टा तिमिरे तिमिरं वाशू! कथं तरिष्यशि वशन्तशेणे।।

मूलकपेशीवर्णः खड्गो निशितशतीक्ष्णश्चन्द्रमश्तकम्।
छिनत्ति राहुश्तथा रोदनं त्वमपि करिष्यशि वशन्तशेणे।।

छुरिकाहश्तः कामशौनिकः कुक्कुटमिव मां करोति शतधा।
ज्वलिष्यामि रागाग्नौ गणिके! त्वमपि मरिष्यशि वशन्तशेणे।।

द्रव्यैस्तुष्यशि, श्वर्णैर्नन्दशि, फाल्गुनस्य हश्ते गान्धारी।
पतिता तथैव करपाशे मे श्वयं पतिष्यशि वशन्तशेणे।।

प्राणधर्मो मे भवेत् संमोहकं वृन्दावनम्।
दिव्यराधाकृष्णलीलाकामुकं वृन्दावनम्।।

यत्र भाषा मौनमास्ते, नो गतिर्मनसो भवेत्।
सख्यभक्तिकौतुकानां प्रेक्षकं वृन्दावनम्।।

किं नु क्लीबं निष्ठुरं तद् ब्रह्म ज्ञात्वा मे सुखम्?
यान्तु प्राणाः! भुक्तिमुक्त्याराधकं वृन्दावनम्।।

वञ्जुकुञ्जं वाग्, द्विरेफास्सर्वशब्दा मद्यशाः।
काव्यवंशीसंगीते मे गायकं वृन्दावनम्।।

विस्मृतास्संसारमर्यादाश्च व्यवहारा मया।
कामयेऽहं नीलब्रह्मोन्मादकं वृन्दावनम्।।

कोऽपि वृक्षो वायसो धेनुर्भवाम्यथ गोपिका।
मृत्युकालेषु भवेन्मे तारकं वृन्दावनम्।।

- ८, राजतिलकबंगलोज़, ममता हॉस्पिटल के सामने, आबादनगर बस स्टॉप समीप, बोपल, अहमदाबाद-३८००४८
मो. ९४२७६ २४५१६, ७८७४५ ३२२२५

# लघुकथा - कच्छपस्य चातुर्यम्

❑ डॉ. नन्दिता सिंघवी

भारतस्य गुजरातप्रान्ते प्राकृतिकसांस्कृतिक-वैभवदृष्ट्या जूनागढनगरं प्रसिद्धमस्ति। तत्र गिराभयारण्यं जैवविविधतादृष्ट्या सम्पन्नमस्ति। वन्यजीवाभयारण्यमे-तदेशियामहाद्वीपे सिंहानामेकमात्रं निवासस्थानरूपेण प्रसिद्धमस्ति। इदमभयारण्यं चतुर्विंशत्यधिकं चतुःशत-मेकसहस्रं (1424) वर्गकिलोमीटरे प्रथते। यस्मिन् पंचत्रिंशदधिकमेकशतमेकसहस्रं (1135) वर्गकिलोमीटरे वन्यप्राणिनां कृते आरक्षिताभयारण्य-मस्ति। अभयारण्येऽस्मिन् बहवः पशु-पक्षिणः सोल्लासं विचरन्ति। सिंहानां समूहाः वने शासनं कुर्वन्तः निर्भया भूत्वा इतस्ततः भ्रमन्ति। सिंहाः जीव-जन्तूनामुपर्याक्रमणं कृत्वा घ्नन्ति स्वभोजनञ्च प्राप्नुवन्ति। गिराभयारण्ये कमलेश्वरबन्धक्षेत्रमस्ति। तत्र बहवः जलचराः आनन्देन निवसन्ति। गिराभयारण्यमव-लोकनार्थं बहवोऽपि पर्यटकाः आगच्छन्ति। एकदा त्रयः सिंहाः बन्धक्षेत्रं प्रति गतवन्तः। तत्र तटक्षेत्रे एकः कच्छपः विश्रामं करोति स्म। स्वाखेटं दृष्ट्वा सिंहाः प्रसन्नाः अभवन्। यद्यपि सिंहान् दृष्ट्वा कूर्मः भयभीतोऽभवत् तथापि धैर्यतः न विचलति। सः चिन्तयति यत् महति संकटेऽस्मिन् किं करोमि? कूर्मः विचारयति यत् तस्य शरीरस्य बाह्यावरणोऽतिकठोरः। बहुवारमनेकसंकटेषु तमेषः रक्षति। अधुना कच्छपः स्वशरीरं संकुच्य स्वावरणे निलीयते। एकः सिंहः खादितुं तं प्रति धावति तथा च कूर्दित्वा तस्योपरि स्वपादं धरति। तत्पश्चात् वनराजः कच्छपं मुखे धृत्वा ततः किञ्चिद् दूरं नीत्वा तं मारयितुं प्रयतते। बहुयत्नोपरान्तमपि वनराजः तस्य नैसर्गिकावरण-मुद्घाटयितुं न शक्नोति। सिंहावन्यौ वनराजस्योपरि हसित्वा अवदतामेतं लघुजीवं मारयितुं किमर्थं न शक्नोषि? वनराजं समया नासीदुत्तरम्। तदा तौ मिलित्वा खादितुं यतेते किन्तु विफलौ भूत्वा निराशौ जातौ। नताननाश्च ततः तेऽन्यत्र गच्छन्ति। संकटेऽपगते सति सः कूर्मोऽपि संतोषेण श्वासं गृहीत्वा स्वमार्गे याति। श्रूयते इतः पूर्वं शशकः स्वचातुर्येण सिंहं पराजयत। अधुना कच्छपः चातुर्येण सिंहान् पराजितवान्। सत्यघटनेयमस्ति या दैनिकभास्करवार्तापत्रे द्वाविंशत्यधिकं द्विसहस्रवर्षस्य (2022) फरवरीमासे दशमदिनांके प्रकाशिता। वनविभागस्य ट्रैकरः महमदबलोचमहोदयः दृश्यमिदं स्वनेत्रेण दृष्ट्वा स्वकैमरा-यन्त्रेण संकलयति स्म।

- सह आचार्या, राजकीय डूँगरमहाविद्यालयः,
बीकानेरम्।
चलवाणी - 9829484662

# गोस्वामितुलसीदासस्य काव्यसिद्धान्तः

❑ कर्मेन्दशर्मा

काव्यम् अर्थात् कवेः कर्म संस्कृतसाहित्ये बहवः विद्वासः काव्यस्य लक्षणम् अकुर्वन्। काव्यस्य लक्षणविषये साहित्यकाराणां मतानि नैकानि सन्ति। कैश्चित् विद्वद्भिः शब्दः एव काव्यं मन्यते, कतिपयैः शब्दार्थौ काव्यं मन्यते, यथा शब्दार्थौ काव्यम् -

भामहेनोक्तम् - शब्दार्थौ सहितौ काव्यम्।[1]

मम्मटमहोदयेनोक्तम् - तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।[2]

आनन्दवर्धनाचार्येण भणितम् - सहृदयहृदयाह्लादि शब्दार्थमयत्वमेव काव्यस्य लक्षणम्।[3]

राजशेखरेण कथितम् - शब्दार्थौ वाक्यं काव्यम्।[4]

**शब्दकाव्यम्**

''दण्डिना प्रोक्तम् - शरीरं तावदिष्टार्थ-व्यवच्छिन्ना पदावली।''[5]

पण्डितराजजगन्नाथेनोक्तम् - रमणीयार्थ-प्रतिपादकः शब्दः काव्यम्।[6]

जयदेवेन कथितम् - निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।

साऽलङ्काररसाऽनेकवृत्तिर्वाक् काव्यनामभाक्।[7]

गोस्वामीतुलसीदासेन स्वकीये काव्ये ''रामचरितमानस'' इत्यस्मिन् प्रथमे श्लोके अप्रत्यक्षरूपेण काव्यस्य लक्षणं प्रतिपादितम्। गोस्वामितुलसीदासमते शब्दार्थयुगलमेव काव्यं भवति। तेनोक्तम्-

**वर्णानामर्थसंघाना रसानां छन्दसामपि।**
**मंगलानां च कर्तारौ वन्दे वाणी विनायकौ।।**[8]

श्लोकेस्मिन् काव्यस्य परिभाषा उक्ता। काव्यं सैव शब्दार्थमयी रचना वर्तते या रसात्मिका छन्दोबद्धा मंगलकारिणी च भवति। ''रामचरितमानस'' इति महाकाव्ये गोस्वामितुलसीदासेनोक्तम्-

**आखर अरथ अलंकृति नाना**
**छन्द प्रबंध अनेक विधाना।।**[9]
**गिरा अरथ जल बीचि सम कहिअत भिन्न न भिन्न।**[10]
**बंदौं सीताराम पद जिन्हहि परम प्रिय खिन्न।**
**कबिहि अरथ आखर बहु साँचा,**
**अनुहरि ताल गतिहि नटु नाचा।।**[11]

हिन्दीसाहित्यस्य प्रख्यातकविना चिन्तामणिमहोदयेनापि काव्यलक्षणं प्रतिपादितम् -

**सगुणनालंकार सहित दोष रहिते जो होई।**
**शब्द अर्थ ताकौ कपि कहत बिबुध सब कोई।।**[12]

**काव्यस्यात्मा**

अस्मिन् विषये ''आत्मा'' इति शब्दस्य लाक्षणिकार्थः काव्यस्य व्यावर्तकधर्मः यं विना काव्यं काव्यं न भवति। काव्यस्य आत्मनः विषये संस्कृताचार्याणां मतानि नैकानि सन्ति, यथा- रीतिं, वक्रोक्तिं, ध्वनिं रसादीनि काव्यस्यात्मा इति स्वीकुर्वन्ति। ते च

आनन्दवर्धनाचार्यमतानुसारेण - काव्यस्यात्मा ध्वनिः।[13]

विश्वनाथमतानुसारेण - वाक्यं रसात्मकं काव्यम्।[14]

वामनमतानुसारेण - रीतिरात्मा काव्यस्य।[15]

हिन्दीसाहित्यकार**केशवदास**महोदयः स्वकीये कविप्रिया इति महाकाव्ये काव्यस्यात्मा विषये उक्तवान्।

निरलङ्कारकविता वनिता च शोभाहीना भवति-

**भूषण बिनु न बिराजही कविता वनिता मित्त।**[16]

गोस्वामी तुलसीदासेनोक्तं यत् रसः काव्यस्य सर्वप्रधानं तत्त्वमस्ति यः काव्यस्यात्मा भवति परन्तु अस्य मते काव्यस्यात्मा भक्तिरसः अस्ति। अस्य काव्यं भक्तिरसप्रधानं काव्यमस्ति। तेनोक्तम् -

**भाव भेद रस भेद अपारा,**
**कवित्त दोष गुन विविध प्रकारा।।**[17]

समजमनियम फूल फलनाना।
हरिपदरति रस वेद बखाना।
निज कवित्त केहिलाग न नीका।
सरस होइ अथवा अतिफीका।
जदपि कवित्त रस एकौ नाहि।
रामप्रताप प्रकट एहि माहीं।

**काव्यस्य हेतुः -**

संस्कृतसाहित्येऽस्मिन् विद्वांसः शक्तिम् उक्त्वा प्रतिभां व्युत्पत्तिम् उक्त्वा निपुणताम् अथवा अभ्यासञ्च उक्त्वा काव्यस्य हेतुं प्रतिपादितवन्तः। काव्यहेतु इति विषयमाधारीकृत्याचार्या नैकानि मतानि प्रस्तुतवन्तः। यथा-

अग्निपुराणे काव्यस्य हेतुः -

**नरत्वं दुर्लभं लोके, विद्या तत्र सुदुर्लभा।**
**कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा।।**[18]

सम्मटाचार्यमतानुसारेण -

**शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।।**[19]

हेमचन्द्रमतानुसारेण - **प्रतिभाऽस्य हेतुः। प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा।**[20]

अस्मिन् विषये हिन्दीसाहित्याचार्याणाम् एवञ्च संस्कृतसाहित्याचार्याणां विचाराणां समत्वमेव दृष्टिगोचरं भवति। ते अपि प्रतिभां निपुणताम् अभ्यासञ्च काव्यस्य हेतुं स्वीकुर्वन्ति रीतिकालीनाचार्यः **भिखारीदास-**महोदयः काव्यार्थं प्रतिभाव्युत्पत्यभ्यासाञ्च सामुख्येन अङ्गीकृतवान्।

अस्मिन् विषये गोस्वामि**तुलसीदास**महोदयेनापि प्रतिभाव्युत्पत्ति-अभ्यासान् काव्यस्य हेतुः इति मन्यते। परन्तु तस्य मते शक्तिः अर्थात् ईश्वर-प्रदत्त-प्रतिभाशक्तिः काव्याय अत्यावश्यकं तत्त्वमस्ति। तेन प्रतिभाशक्तिः स्वकीये ग्रन्थेऽस्मिन् व्यञ्जनया प्रतिपादिता अस्ति। यथा तेनोक्तम्-

**सारद दाकनारि समस्वामी।**
**समुसूत्रधार अन्तरजामी।**
**जेहि पर कृपा कंरहि जनुनानी।**
**कपिउर अजिर नचावही बानी।**
**संभु प्रसाद सुमति हिअ हुलसी।**
**रामचरितमानस कवि तुलसी।।**[21]

काव्यस्य प्रयोजनम् -

काव्यप्रयोजनस्याभिप्रायः तत् उद्देश्यम् उक्त्वा तत् फलं यस्य सिद्धे काव्यरचना भवतीति। प्राचीनकाव्यशास्त्रेषु नैकानि प्रयोजनानि प्रतिपादितानि विद्वद्भिः। तानि च- यशः, अर्थः, व्यवहारः, अमंगलनाशः, कान्तासम्मितयोपदेशः पुरुषार्थः चेत्यादयः। प्रयोजनं द्विविधं यशादि कविनिष्ठप्रयोजनम् उपदेशादि सहृदयनिष्ठञ्च भवतः। प्रयोजनविषये आचार्याणां नैकानि मतानि सन्ति। यथा-

**मम्मटमहोदयमतम् -**

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।**[22]

**वामनमतम् -**

**काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्ति हेतुत्वात्।**[23]

**भामहमतम् -**

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्।।**[24]

काव्यप्रयोजनविषये तुलसीदासमहोदयेन प्रतिपादितं यत् संसारेऽस्मिन् जीवस्य यावत्यः वै प्रवृत्तयः सन्ति तासां सर्वासां लक्ष्यं दुःखनिवृत्तिः तथा सुखावाप्तिरेवाऽस्ति। काव्यरचना तथाच काव्यभावना एते उभे अपि तत्रैव अन्तर्निहिते। अतः तयोः मूलोद्देश्यः अपि सुखोपलब्धिरेवेति। तुलसीदासमहाभागः वर्णयति-

**स्वान्तः सुखाय तुलसी रघुनाथगाथा**
**भाषा निबंधमति मंजुलमातनोति।**[25]

**सुत वित लोके ईषनातीनि**
**केहि कैमति इन्ह कृत न मलीनी।।**[26]

अतः वक्तुं शक्यते यत् महाभागतुलसीदासोऽपि साहित्यजगति काव्यसिद्धान्तः इति विषयमधिकृत्य संस्कृतसाहित्याचार्याणां च मतैक्यं प्रतिपादितवान्।

**- शोधार्थी,**

**ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

संदर्भ :-

1. काव्यालङ्कारः, भामहः
2. काव्यप्रकाशः, मम्मटः,
3. ध्वान्यालोकः, आनन्दवर्धनः,
4. काव्यमीमांसा:, राजशेखरः,
5. काव्यादर्शः, दण्डी
6. रसगङ्गाधरः, पण्डितराजजगन्नाथः,
7. चन्द्रालोकः, जयदेवः,
8. रामचरितमानस, १/१
9. रामचरितमानस, १/९/४
10. रामचरितमानस, १/१८
11. रामचरितमानस, २/२४१/२
12. कविकुलकल्पतरु, चिन्तामणि:
13. ध्वन्यालोक:
14. साहित्यदर्पण:
15. काव्यालङ्कारसूत्रम्
16. कविप्रिया, ५/१
17. रामचरितमानस, १/९/५, १/३७/७, १/८/६, १/१०/४
18. अग्निपुराण:
19. काव्यप्रकाश:
20. शब्दानुशासनम्, हेमचन्द्रः
21. रामचरितमानस, १/१०५/३, १/३६/१
22. काव्यप्रकाश:
23. काव्यालङ्कारसूत्रम्
24. काव्यालङ्कार:
25. रामचरितमानस, १/७
26. रामचरितमानस, ७/७१/३

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - **2139101912498**
**IFS Code - CNRB0002139**

पुस्तक-समीक्षा

# मन्दाकिनीपर्यावरणविशेषाङ्कः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

राजस्थाने शाहपुरा (जयपुर) जनपदतः प्रकाश्यमाना शोधपत्रिका 'साहित्यमन्दाकिनी' समये समये विश्वमानवतया सम्बद्धान् विषयानवलम्ब्य विशेषाङ्कान् प्रकाशयतीति विदन्त्येव शोधार्थिनः। एतस्याः प्रकाशन- संस्थानमस्ति राजस्थान- ग्रामोत्थान एवं संस्कृत-अनुसन्धान-संस्थानम्। अनेन संस्थानेन या विचारगोष्ठ्यो वान्यायोजनानि च विधीयन्ते तेषां विषयविशेषं विवेचयन्तो विशेषाङ्का अनया पत्रिकया प्रकाश्यन्ते।

गतेषु दिवसेषु विश्वजनीनां पर्यावरण चेतनामवलम्ब्यैका राष्ट्रिया विद्वद्गोष्ठी संस्थानेनाऽऽयोजिताऽभूत्, तस्या विषयमधिकृत्य देशविख्यातैर्विद्वद्भिः प्रस्तुतान् शोधलेखान् प्रस्तुवन् विशेषाङ्कः पत्रिकयाऽनया प्रकाशितोऽस्ति। संस्कृतवाङ्मये पर्यावरणचेतनाविषयमालम्ब्य विविधाः शोधलेखा अस्मिन् वेदेषु, पुराणेषु, विभिन्नेषु शास्त्रेषु च प्रकृतिसंरक्षणपर्यावरणसंरक्षणादिविषयाः कथं विमृष्टाः सन्तीति विस्तृत्य विवेचयन्ति। सुप्रथितस्य कुलपतिपदमधितस्थुषः प्रो. अभिराजराजेन्द्रमिश्रस्य लेखो वैदिकं चिन्तनं विवेचयति, सुविदितस्य कविवर्यस्य प्रो. रमाकान्तशुक्लस्य काव्यरचना 'अव रे मानव पर्यावरणम्' पर्यावरणसंरक्षणस्य संदेशं प्रददाति। इत्थमेव सुप्रथितैर्विद्वद्भिः संस्कृतवाङ्मयस्य विविधेषु ग्रन्थेषु पर्यावरणचेतनाया विवेचनं कुर्वाणा विषया विमृष्टाः सन्ति। पत्रिकासम्पादकस्य डॉ. शङ्करलाल शास्त्रिणो विस्तृते शोधलेखेऽपि व्यापकरूपेण विषयविवेचनं विहितमस्ति, देवर्षिकलानाथशास्त्रिणो लेखेऽपि।

साहित्यमन्दाकिनी - वर्षम् १, अङ्क 1-2 (अक्टूबर 2021 - मार्च 2022) सम्पादकः डॉ.शङ्करलालशास्त्री, प्रकाशक- राजस्थान-ग्रामोत्थान एवं संस्कृत-अनुसंधान-संस्थानम्, शाहपुरा (जयपुरम्), मूल्यम् 50/-, वार्षिक शुल्कम् 200/-

---

# शोधप्रभा

बहोः कालात् केन्द्रीयविश्वविद्यालयरूपेण समादृतस्य दिल्लीस्थ श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधपत्रिका 'शोधप्रभा' 46 वर्षेभ्यो निरन्तरं प्रकाश्यमानाऽस्तीति विदन्त्येव शोधविद्वांसः। त्रैमासिकीयं शोधपत्रिका संस्कृते, हिन्दीभाषायामाङ्गलभाषायां चेति भाषात्रये स्तरीयान् शोधलेखान् प्रकाशयति। देशस्य विविधेभ्योऽञ्चलेभ्यः प्रतिष्ठिताः शोधविद्वांसः शोधार्थिनश्च प्रेषयन्ति पत्रिकायै स्वकीयान् शोधलेखान्। सद्य एवास्या अङ्कद्वयं प्राप्तमस्माभिः (46/1 तथा 46/2), 2021 ई. वर्षस्य जनवरी मासाङ्कः, अप्रेलमासाङ्कश्च। अङ्कद्वयेऽस्मिन् तिसृष्वपि भाषासु प्रतिष्ठितानां शोधविदुषां लेखा यथापूर्वं प्रकाशिताः सन्तीति सूचयन्तः प्रमोदामहे।

शोधप्रभा (त्रैमासिकी शोधपत्रिका) प्रधानसम्पादकः - प्रो.मुरलीधर-पाठकः कुलपतिः, सम्पादकः - प्रो. शिवशङ्करमिश्रः शोधाविभागाध्यक्षः, सहसम्पादकः - डॉ. ज्ञानधर पाठकः शोधसहायकः, प्रकाशकः - श्रीलालबहादुरशास्त्रीराष्ट्रिय संस्कृत-विश्वविद्यालयः, बी4, कुतुबइंस्टिट्यूशनल एरिया, नई दिल्ली-16, मूल्यम् 125/-, वार्षिक शुल्कम् 500/-

अत्र

1985

1975

यों

1985 RUW

आश्वस्त

2003

आयुर्वेद-स्तम्भः

# ग्रीष्मे ग्रैष्मिको विधिः कर्तव्यः

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**भारतवर्षस्योत्तरे पश्चिमे मध्यमे च भूभागे षण्णामृतूनां सम्यग्विभागोऽवलोक्यते, कदाचित् पूर्वस्मिन्नपि भूभागे यत्र कुत्रापि न्यूनाधिक-रूपेणानुभूयते, किन्तु दक्षिणे भागे तु केवलस्य ग्रीष्मस्य वर्षर्तोश्चानुभूतिर्भवति शीतस्य तु लेशमात्रोऽपि प्रभावो न जायते तत्र। देशे कुत्रचित्तीव्रसन्तापात्मकस्योष्णप्रवातसहितस्य ग्रीष्मस्य कुत्रचिच्चाल्पप्रभावात्मकस्य ग्रीष्मस्यानु-भूतिङ्कुर्वन्ति तत्रत्याः जनाः, दाक्षिणात्यास्तु ग्रीष्मे समुद्रजलोत्थ-बाष्पसम्मिश्रिततरणितापाद्विशिष्टस्य घर्मस्यानुभूतिङ्कुर्वन्ति स्वेदलिप्तास्त्वभ्यस्तास्ते स्वे स्वे कार्ये निरताः सञ्चरन्ति तीव्रतरणितापेऽपि ।**

भारतवर्ष के उत्तर, पश्चिम और मध्यम भूभाग में 6 ऋतुओं का सम्यक् विभाग देखा जाता है, कभी-कभी पूर्वी भाग में भी जहाँ-तहाँ कहीं भी यह ऋतुविभाग न्यूनाधिक रूप में अनुभूत किया जाता है। किन्तु दक्षिण भाग में तो केवल ग्रीष्म की एवं वर्षा ऋतु की ही अनुभूति होती है। वहाँ पर शीत का तो लेशमात्र भी प्रभाव नहीं होता है। इस देश में कहीं पर तीव्र संताप वाले उष्ण प्रवात (लू) से युक्त ग्रीष्म का और कहीं पर अल्प प्रभाव वाले ग्रीष्म का अनुभव वहाँ के रहने वाले लोग करते हैं, दक्षिण भारत में रहने वाले लोग तो ग्रीष्म ऋतु में समुद्र जल से उठी हुई भाप से मिश्रित सूर्य के संताप (धूप) से विशिष्ट प्रकार की गर्मी की अनुभूति करते हैं, स्वेद में लिप्त हुए (जिनके स्वेद आ रहा हो इस प्रकार के) अभ्यस्त वे लोग अपने अपने कार्य में लगे हुए सूर्य के तीव्र संताप में (धूप में) भी विचरण करते रहते हैं।

**आचार्यश्चरको निगदति यत् - यदा जन्तुर्यव-कोद्दालककोरदूषप्रायाण्यन्नानि भुङ्क्ते भृशोष्ण-तीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकु-लत्थसूपक्षारोपसंहितं, दधिदधिमण्डोदश्वित्कट्व-म्लकाञ्जिकोपसेकं वा, वाराहमाहिषाविक-मात्स्यगव्यपिशितं, पिण्याकपिण्डालुशुष्क-शाकोपहितं, मूलकसर्षपलशुनकरञ्जशिग्रु-मधुशिग्रु (खडयूष)- भूस्तृणसुमुखसुरसकुठेरक-गण्डीरकालमालकपर्णासक्षवकफणिज्झकोपदंशं, सुरासौवीरतुषोदकमैरेयमेदकमधूलकशुक्तकुवलब दराम्लप्रायानुपानं वा, पिष्टान्नोत्तरभूयिष्ठम्; उष्णाभितप्तो वाऽतिमात्रमतिवेलं वाऽऽमं पयः पिबति, पयसा समश्नाति रौहिणीकं, काणकपोतं वा सर्षपतैलक्षारसिद्धं, कुलत्थपिण्याकजाम्ब-वलकुचपक्वैः शौक्तिकैर्वा सह क्षीरं पिबत्युष्णा-भितप्तः; तस्यैवमाचरतः पित्तं प्रकोपमापद्यते, लोहितं च स्वप्रमाणमतिवर्तते।**

**तस्मिन् प्रमाणातिवृत्ते पित्तं प्रकुपितं शरीरमनु-सर्पद्यदेव यकृत्प्लीहप्रभवाणां लोहितवहानां च स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य**

**प्रतिरुन्ध्यात् तदेव लोहितं दूषयति ।।** च.नि2/477

आचार्य चरक कहते हैं कि जब व्यक्ति यवक (जई), उद्दालक (वनकोदो), कोरदूष (कोदो) प्रधान अन्न (आहार) को खाता है तथा इसके अतिरिक्त अत्यधिक उष्ण और तीक्ष्ण अन्न की जातियों को खाता है तथा निष्पाव (सेम, बालोर की फली), उड़द, कुलथी का सूप (दाल की तरह बना हुआ खाद्य पदार्थ) क्षार मिलाकर खाता है अथवा दही, दही का मंड (ऊपर का मलाई वाला भाग) एवं उदश्वित् (दही का पानी) एवं कट्वर (खट्टी छाछ), खट्टी काञ्जिक के साथ भोजन करता है तथा वराह, भैंसा, भेड़, मछली एवं गाय के मांस को खाता है, इनको पिण्याक (तिल का कल्क), पिंडालु एवं शुष्क शाक के साथ सेवन करता है एवं मूली, सरसों, लहसुन, करंज, सहिंजना, मीठा सहिंजना, गंधतृण, काली तुलसी, तुलसी, कुठेरक (काली वन तुलसी), गण्डीर (भण्डीर या शिरीष), कालमालक, पर्णास (साधारण वन तुलसी), नकछींकनी, फणिज्झक (गंधतुलसी या मरवा) इनके व्यंजन बनाकर सेवन करता है अथवा सुरा, सौवीर, तुषोदक, मैरेय, मेदक, मधूलक, शुक्त (सिरका) इत्यादि विभिन्न प्रकार के मद्य के भेदों का सेवन करता है तथा बड़े बेर के रस (कुवल), छोटे बेर के रस आदि अम्ल द्रव्यों का प्रयोग प्रायः अनुपान के रूप में करता है या पीठी एवं मैदा से बने पदार्थों का अधिक मात्रा में सेवन करता है अथवा भोजन के अंत में अथवा उष्णता से संतप्त होकर अत्यधिक मात्रा में बार-बार कच्चे दूध को पीता है अथवा दूध के साथ रोहिणी के शाक का सेवन करता है या सरसों के तैल एवं क्षार के साथ काणकपोत के मांस को सिद्ध करके सेवन करता है । कुलथी, तिल का कल्क, जामुन, पका हुआ बड़हल अथवा बेर के फल से बनाए गए शुक्त ( सिरका) आदि के साथ दूध का सेवन करता है अथवा गर्मी से सन्तप्त होकर दूध पीता है, इस प्रकार के आहार का सेवन करने वाले उस व्यक्ति के पित्त का प्रकोप हो जाता है और रक्त भी अपने प्रमाण से अधिक हो जाता है ( उस में द्रवाधिक्य हो जाता है), रक्त के अधिक मात्रा में बढ़ जाने के कारण शरीर में फैलता हुआ जब यकृत् तथा प्लीहा इत्यादि से उत्पन्न होने वाले रक्त को जो रक्त के प्रवाह से गुरु हो गए हैं उन रक्तवाही स्रोतस् के मुख को प्राप्त करके रोक देता है, तब वही पित्त रक्त को दूषित करता है ।

**अत्रैतस्य विवरणस्योल्लेखस्योद्देश्य एष एवास्ति यदेतेषां ग्रीष्मेऽपि विवर्जनमावश्यकम्। वर्तमान-काले तूपरिनिर्दिष्टानां केषाञ्चिद्द्रव्याणां सेवनस्य प्रचलनं नास्ति, किन्तु नवीनेऽस्मिन् युगे प्रचलितानां पूर्वतः विनिर्मितानां केषाञ्चिद्विशिष्टानां खाद्यान्नानां प्रचलनं विशेषेण वर्तते, तेषामधिक-कालपर्यन्तं संरक्षणार्थं तेषु "preservative" नाम्ना दुःख्यातानां स्वास्थ्यनिर्घातकानां रासायनिकानां द्रव्याणां प्रयोगङ्कुर्वन्ति व्यवसायिनः। एतादृग्वि-धानां पूर्वतो विनिर्मितानां द्रव्याणां सेवनेनापि रक्तं प्रदूषितम्भवति पित्तमपि च प्रकोपतामापद्यते।**

यहाँ पर इस विवरण के उल्लेख करने का उद्देश्य यही है कि इन सभी का ग्रीष्म ऋतु में भी विवर्जन करना परमावश्यक है । वर्तमान काल में तो ऊपर निर्दिष्ट किए

गए कुछ द्रव्यों के सेवन का प्रचलन नहीं है किंतु इस नवीन युग में पहले से ही बनाए गए कुछ विशिष्ट खाद्य आहारों का प्रचलन विशेष रूप से है, उनका अधिक कालपर्यंत संरक्षण करने के लिए उनमें प्रिजर्वेटिव नाम से दुर्ख्यात स्वास्थ्य का विनाश करने वाले रासायनिक द्रव्यों का प्रयोग व्यवसायी लोग करते हैं, इस प्रकार के पहले से बनाए गए द्रव्यों का सेवन करने से भी रक्त दूषित होता है और पित्त भी प्रकोप को प्राप्त हो जाता है।

**उपरिप्रोक्तानामेतेषां निदानानां परिवर्जनमावश्यकम्। ग्रीष्मे तु सेव्यमानान्येतानि निदानानि त्वरितमेव प्रभावं प्रदर्शयन्ति, तदपवारणार्थं ग्रीष्मप्रभावस्य च मन्दीकरणार्थं प्रदूषितस्य लोहितस्य च शुद्धिकरणार्थं प्रकुपितस्य च पित्तदोषस्य प्रशमनार्थं तज्जनितानां रोगाणाञ्च विनाशार्थं विशिष्टानामायुर्वेदोक्तानामुपक्रमाणां द्रव्याणां योगानाञ्च सेवनङ्करणीयम्।**

ऊपर बताए गए इन रोगकारक हेतुओं का परिवर्जन आवश्यक है। ग्रीष्म ऋतु में तो सेवन किए जाते हुए ये रोगकारक निदानस्वरूपक द्रव्य जल्दी ही अपने प्रभाव को प्रदर्शित करते हैं। उस प्रभाव को दूर करने के लिए एवं ग्रीष्म के प्रभाव को मन्द करने के लिए तथा दूषित हो चुके रक्त के शुद्धिकरण के लिए एवं प्रकुपित पित्तदोष के प्रशमन के लिए और उससे उत्पन्न रोगों के विनाश के लिए विशिष्ट आयुर्वेदीय उपक्रमों का और द्रव्यों का तथा योगों का सेवन करना चाहिए।

**ग्रीष्मे शीतवीर्यात्मकानां द्रव्याणां सेवनं सुखदं भवत्यम्लरसात्मकानामपि केषाञ्चिद्विशिष्टानां निम्बु-कर्मरङ्गाम्रपरुषकादीनां प्रयोगोऽपि सुखदो भवति। यद्यपि सामान्यतयाऽम्लः रस उष्णवीर्यात्मको भवति तर्ह्यपि दीपनीयानाम्रुचिकराणां तर्पणात्मकानाञ्चाम्लरसात्मकानां द्रव्याणामपेक्षितमात्रायां प्रयोगस्तु ग्रीष्मेऽपि सुखदः पथ्यस्तर्पणात्मकश्च भवति। आचार्यश्चरकः कथयति यत्-**

**अम्लो रसो भक्तं रोचयति, अग्निं दीपयति, देहं बृंहयति ऊर्जयति, मनो बोधयति, इन्द्रियाणि दृढीकरोति, बलं वर्धयति, वातमनुलोमयति, हृदयं तर्पयति, आस्यमास्रावयति, भुक्तमपकर्षयति क्लेदयति जरयति, प्रीणयति, लघुरुष्णः स्निग्धश्च।**

ग्रीष्म ऋतु में शीत वीर्य वाले द्रव्यों का सेवन सुख देने वाला होता है और कुछ विशिष्ट अम्ल रस वाले नींबू, नारंगी, कच्चा आम (कैरी), फालसा इत्यादि का प्रयोग भी सुख देने वाला होता है। यद्यपि सामान्यतया अम्ल रस उष्ण वीर्य वाला होता है फिर भी दीपनीय और रुचि उत्पन्न करने वाले तथा तर्पण स्वरूप वाले अम्ल रसात्मक द्रव्यों का प्रयोग तो अपेक्षित मात्रा में ग्रीष्म में भी सुख देने वाला, पथ्य और तर्पण करने वाला होता है। आचार्य चरक कहते हैं कि-

अम्लरस भोजन में रुचि उत्पन्न करता है, जाठराग्नि को दीप्त करता है, शरीर की वृद्धि करता है अर्थात् शरीर में बृंहण करता है (पुष्ट करता है) और ऊर्जा (शक्ति) को बढ़ाता है, मन को प्रबुद्ध करता है तथा एकादश इंद्रियों को दृढ़ करता है, बल की वृद्धि करता है, वात का अनुलोमन करता है, हृदय का तर्पण करता है (तृप्त करता है), मुख

के स्राव को बढ़ाता है और भोजन को खींचकर यथास्थान (आमाशय में) ले जाता है, उसको गीला करता है और पचाता है, यह मन को प्रसन्न रखने वाला तथा लघु, उष्ण और स्निग्ध होता है।

**किन्त्वधिकः प्रयोगस्तु हानिप्रद एव भवति, यथा-**

**स एवङ्गुणोऽप्येक एवात्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्षयति, सम्मीलयत्यक्षिणी, संवेजयति लोमानि, कफं विलाययति, पित्तमभिवर्धयति, रक्तं दूषयति,मांसं विदहति, कायं शिथिलीकरोति, क्षीणक्षतकृशदुर्बलानां श्वयथुमापादयति, अपि च क्षताभिहतदष्टदग्धभग्नशूनप्रच्युतावमूत्रितपरिसर्पित मर्दितच्छिन्नभिन्नविश्लिष्टोद्विद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात्, परिदहति कण्ठमुरो हृदयं च।** (च.सू.26/(2)43।

लेकिन इसका अधिक प्रयोग तो हानिकारक ही होता है जैसा कि कहा गया है-

वह इस प्रकार के गुणों से युक्त होता हुआ भी इस एक ही अम्ल का अत्यधिक सेवन करने से दाँतों को हर्षित करता है (दंतहर्ष उत्पन्न करता है), प्यास अधिक लगाता है, आंखों को बंद कराता है (अक्षिसम्मिलन कराता है), रोमांच कराता है, कफ को पिघलाता है, पित्त को अधिक बढ़ाता है, रक्त को दूषित करता है, मांस धातु का दहन करता है और शरीर को शिथिल करता है , क्षीण, कृश एवं दुर्बल पुरुषों के शोथ को उत्पन्न करता है तथा कटे हुए, चोट लगे हुए, दाँतों से काटे हुए, जले हुए एवं टूटे हुए, शोथयुक्त तथा अपने (संधियों के) स्थानों से च्युत हुए (भ्रष्ट हुए), जिन स्थानों या अंगों पर विषैले जंतुओं ने मूत्रत्याग कर दिया है ऐसे (अवमूत्रित) एवं जहाँ पर विषैले जंतु रेंग रहे हैं ऐसा प्रतीत हो, भिन्न (कटकर अलग हुए), विश्लिष्ट (अभिघात से कटे हुए या अपने स्थान से खिसके हुए), उद्विद्ध (सूई-कांटे इत्यादि से विद्ध) एवं जो प्रहार इत्यादि से पीसे हुए हैं (चूर्णित हुए हैं) इत्यादि को अम्लरस आग्नेय स्वभाव वाला होने के कारण (या अग्निगुणयुक्त होने के कारण) इन सब को पकाने वाला अर्थात् इनको पकाता है (इनमें पाक उत्पन्न कर देता है) तथा कंठप्रदेश, उरःप्रदेश और हृदय को चारों ओर से जलाता है (इनमें जलन उत्पन्न करता है) ।

**ग्रीष्मे ग्रैष्मिको विधिः कर्तव्यः-**

ग्रीष्मे शीताः परिषेकाः, शीतावगाहाः कर्तव्याः । तत्र च स्वादु शीतं द्रवं स्निग्धञ्चान्नपानं हितं भवति । पेयपदार्थानां प्रयोगस्तु विशेषेण करणीयः, पेयेषु त्वाम्रप्रपाणकं, शीतं सशर्करं यवसक्तुमन्थं, निम्बुरससंयुक्तं सशर्करमीषल्लवणमिश्रितं सिकञ्जीति ख्यातं पेयं पेयम् । मृद्घटे पूरितं तत्प्रभावाच्च सञ्जातशीतलं जलमोष्ठसंसृष्टेन हस्ततलेनाथवाञ्जलिना पिबेत् । अतितृषितो हि जनश्चेच्चुलुकेनाथवाऽऽचमनविधिना पिबति मृद्घटजलं तदाऽऽश्वस्तः सः तृप्तिमनुभवति, छर्दिग्रस्तो हि जन अनेनैव विधिना पिबत्याचूषणपूर्वकं वाऽल्पमल्पं वारि तदा सुखमनुभवति, तालुशोषेऽप्येवमेव करणीयम्।

ग्रीष्म काल में ग्रीष्म ऋतु के लिए कही गई विधि को करना चाहिए-

ग्रीष्म में शीतल परिषेक, पानी में डुबकी लगाना ( पानी में बैठे रहना) इत्यादि करना चाहिए । ग्रीष्म ऋतु में मधुर, शीत, द्रवप्रधान स्निग्धतायुक्त अन्नपान का प्रयोग करना हितकारी होता है । पेय-पदार्थों का प्रयोग तो विशेष रूप से करना चाहिए, पेय-पदार्थों में तो कच्चे आम से बनाया गया पना (कैरी की छाछ या कैरी का पानी), शीतल एवं शर्करा मिलाया हुआ जौ के सत्तू का मन्थ (पानी में घुला हुआ सत्तू), नींबू का रस मिला हुआ एवं शर्करासहित तथा कुछ लवण मिश्रित शिकंजी नाम से विख्यात पेय को पीना चाहिए । मिट्टी के घड़े में भरे हुए और उसके प्रभाव से शीतलता को प्राप्त हुए पानी को ओष्ठ से संस्पर्श किए हुए हस्ततल (हथेली) से अथवा अंजली बना करके उस से पानी को पीना चाहिए । अत्यधिक तृषित व्यक्ति यदि चुलुक से (चुल्लु से) अथवा आचमन की विधि से उस मिट्टी के घड़े के जल को पीता है तब आश्वस्त हुआ वह तृप्ति का अनुभव करता है । यदि वमनरोग से ग्रस्त व्यक्ति इसी विधि से अथवा पानी का आचूषण करते हुए थोड़े-थोड़े पानी को पीता है तब सुख का अनुभव करता है, तालुशोष में भी इसी प्रकार से करना चाहिए ।

**आतपेन सन्त्रस्तं जनं किञ्चिद्विश्रम्यैव जलं पाययेत्, घर्मसन्त्रस्तेन स्वेदक्लिन्नेन च सहसा पीतं शीतलं जलं प्रतिश्यायश्वासकासहिक्काशिरःशूलादींश्च करोति । यदि चेन्मूर्च्छितोऽस्ति तदा मुखे शरीरे च जलसिञ्चनन्तु करणीयं किन्तु पानीयं न पाययितव्यम् । मद्यस्य स्वभावपाकाभ्यामम्लस्य ग्रीष्मविरुद्धत्वेन ग्रीष्मे मद्यं न पेयं किन्तु यो हि जनः मद्यसात्म्योऽस्ति तेन तु मद्यस्योष्णाम्लत्वाद्यपहरणार्थं बहुतरं पानीयं प्रक्षिप्य पातव्यमिति । अत्रैतत् स्पष्टरूपेण ज्ञातव्यमस्ति यन्मद्यं ग्रीष्मे न पातव्यमेव तावत्; मद्यसात्म्यानां सात्म्यमद्यत्यागे सात्म्यत्यागजा रोगा भवन्ति, तेन तस्याल्पं वा सुबहूदकं वा देयमित्यर्थः ।**

आतप से (धूप से) पीड़ित व्यक्ति को तो कुछ विश्राम करने के बाद ही जल पिलाना चाहिए, गर्मी से पीड़ित हुआ व्यक्ति और पसीने में तर-बतर हुए व्यक्ति के द्वारा सहसा पिया गया शीतल जल प्रतिश्याय (जुकाम), श्वास, कास, हिक्का (हिचकी) एवं शिरःशूल इत्यादि को उत्पन्न करता है । यदि व्यक्ति मूर्छित है तब उसके मुख पर और शरीर पर जल का सिंचन करना चाहिए ( जल के छींटे देने चाहिए) किंतु पानी नहीं पिलाया जाना चाहिए । स्वभाव एवं पाक में मद्य का अम्ल स्वरूप वाला होने के कारण और इसीलिए ग्रीष्म में उसका प्रयोग विरुद्ध स्वभाव वाला होने के कारण ग्रीष्म ऋतु में मद्य नहीं पीना चाहिए किंतु जो व्यक्ति मद्य के अभ्यास वाला है अर्थात् निरंतर मद्य पीने वाला है उसको तो उसके द्वारा तो मद्य की उष्णता और अम्लता इत्यादि को दूर करने के लिए अधिक पानी डालकर पीना चाहिए । यहाँ यह स्पष्ट रूप से जानने योग्य है कि मद्य ग्रीष्म में नहीं पीना चाहिए, लेकिन जो व्यक्ति मद्यसात्म्य है वह यदि उस सात्म्य मद्य को (अभ्यास किए हुए मद्य को) सहसा छोड़ देता है तो मद्य के सहसा त्याग करने के कारण सात्म्यत्याग से उत्पन्न होने वाले रोग हो जाते हैं । इसलिए उसको अल्प मद्य देना चाहिए अथवा बहुत अधिक पानी मिलाया हुआ मद्य देना चाहिए, यह तात्पर्य है ।

**स्वल्पं घृतम्, उष्णं शीतीकृतं पयोऽथवा जलसम्मिश्रितं सशर्करञ्च शीतं पयः पिबन् सशाल्यन्नञ्च भजन् ग्रीष्मे न सीदति। वर्तमानकाले पारम्परिकान् पेयान् विहाय कृत्रिमरूपेण विनिर्मितान् पेयान् प्रति समाकृष्टाः जनाः पिबन्ति तानाधिक्येन। अल्पस्य स्वादस्य हेतोर्बहु स्वास्थ्यं हातुमिच्छन्तस्ते विचारेषु कीदृशाः सन्तीति तु विद्वद्भिरेव निर्लोचनीयः। राजस्थाने तु प्रतिदिनमेव पेयात्मिकां 'राबडी' इत्याख्यां पिबेत्। पेया भवेन्नामोष्णा शीता वा, रात्रौ विनिर्मितामेतां पेयामुष्णामेव पिबेद्रात्रौ तामेव तु शीतां प्रातःकाले दधिमिश्रितां तक्रमिश्रितां वा पिबेत्। छच्छिकामपि पिबेत्तृप्तिपर्यन्तम्।**

थोड़ी मात्रा में घी तथा गर्म करके ठंडा किया गया दूध अथवा जल मिलाया हुआ शर्करायुक्त ठंडा दूध पीता हुआ व्यक्ति (पीने वाला व्यक्ति) एवं शालि चावलों से बनाए हुए अन्न का प्रयोग करता हुआ व्यक्ति ग्रीष्म ऋतु में दुःखी नहीं होता है। वर्तमान काल में पारंपरिक पेय पदार्थों को छोड़कर कृत्रिम रूप से बनाए गए पेय पदार्थों के प्रति अधिकांश लोग आकृष्ट होते हैं और उन पेय पदार्थों को अधिकता से पीते हैं, थोड़े से स्वाद के लिए अधिक स्वास्थ्य का हनन करने की इच्छा करते हुए वे व्यक्ति विचारों में किस प्रकार के होते हैं यह तो विद्वानों के द्वारा ही देखने योग्य है। राजस्थान प्रांत में तो प्रतिदिन ही पीने योग्य 'राबड़ी' नाम की पेया को पीना चाहिए भले ही वह उष्ण हो अथवा शीतल हो, रात्रि में बनाई गई राबड़ी का रात्रि में उष्ण स्वरूप में ही पान करना चाहिए तथा उसी को शीतल को दही मिली हुई को अथवा तक्र मिली हुई को प्रातःकाल पीना चाहिए, छाछ को भी तृप्तिपर्यंत पीना चाहिए।

**'लस्सी' इति नाम्ना ख्यातं सशर्करं मथितमेला-केसरादिसंयुक्तं केतक्यर्केण तरुण्यर्केण वा किञ्चित्सिञ्चितं किशमिश-वातामखण्डैश्च सुसज्जितं दधिनिर्मितं घोलमपि रुचिपूर्वकं पीतं तृप्तिमापादयति मनो हर्षयति च ग्रीष्मे। दुग्ध-दधिमिश्रितः विशिष्टया प्रक्रियया विनिर्मितः पदार्थः चरकसंहितायां रसाला नाम्ना वर्णितोऽस्ति। रसाला बर्हिणी वृष्या च भवति, सा तु विशेषेण सेवनीया भवति ग्रीष्मे, वर्तमानकाले तु सा 'श्रीखण्ड' इति नाम्ना बहु प्रचलिता वर्तते। दुग्धेन विनिर्मितामतिशैत्यां 'कुल्फी' इति ख्यातां शनैः शनैः लिह्याज्जिह्वया। विशुद्धां शीततरां सर्वप्रियाम् 'आईसक्रीम' इति नाम्ना विख्यातामपि लिह्याद्धैर्यपूर्वकम्।**

लस्सी इस नाम से प्रसिद्ध शक्कर मिली हुई एला, केसर इत्यादि से युक्त एवं महुआ तथा केवड़े के अर्क अथवा गुलाब के अर्क से किंचित् छिड़काव किया हुआ किशमिश एवं बादाम के टुकड़ों से अच्छी प्रकार से सजाया गया दही से निर्मित घोल (जो कि लस्सी कहलाता है) रुचिपूर्वक पिया गया वह ग्रीष्म ऋतु में तृप्ति को प्राप्त करवाता है, मन को हर्षित करता है। दूध और दही सम्मिश्रित विशिष्ट प्रक्रिया से बनाया गया पदार्थ चरकसंहिता में रसाला नाम से वर्णित है। रसाला बृंहण करने वाली और वृष्य होती है, वह तो विशेष रूप से ग्रीष्म ऋतु में सेवन करने योग्य होती है। वर्तमान काल में तो

वह श्रीखंड इस नाम से अत्यधिक प्रचलित है॥ दूध से बनाई गई अत्यधिक शीतल 'कुल्फी' इस नाम से विख्यात को जिह्वा से थोड़ा-थोड़ा चाटना चाहिए । विशुद्ध एवं अत्यधिक ठंडी सबको प्रिय लगने वाली आइसक्रीम इस नाम से विख्यात को भी धैर्यपूर्वक चाटना चाहिए।

**फलेषु तु कालिन्द-आम्र-जम्बूफल-लीचिका-द्राक्षा-दाडिम-चीकू- फल्गु-कर्कटिका-मधुकर्कटिका-क्षीरिणीत्यादीनां प्रयोगः करणीयः। अवधानतया खर्बूज( उर्वारुक )भक्षणं तन्निर्मितं प्रपाणकमपि समुचितम्। बीजपूरजीरक-विनिर्मितोऽवलेहः रागो वा, पूतिह्रापत्रैः धान्यकस्य हरितपत्रैर्वा विनिर्मितस्य रागो ( चटनी ) भोजनेन सह प्रयोज्यः। ग्रीष्मकालीने दिवसे त्वेकवारं वारद्वयं वा नारिकेलजलस्य, इक्षुरसस्य, बिल्वशार्करस्य, 'नीरा' इति नाम्ना ख्यातस्य लघुखर्जूरफलरसस्य च प्रयोगः करणीयः।एतेष्वन्यतमस्य द्वयोरेव वा प्रयोगः समुचितः।**

फलों में तो तरबूज, आम, जामुन, लीची, अंगूर, दाड़िम, चीकू, अंजीर, ककडी, पपीता एवं खिरनी इत्यादि का प्रयोग करना चाहिए। सावधानी से खरबूजे का भक्षण भी और उस से निर्मित पणे का भी समुचित प्रयोग करना चाहिए। बिजोरा निंबू के अंदर के जीरे से बनाया हुआ अवलेह अथवा चटनी तथा पुदीने के पत्तों से बनाई गई अथवा धनिए के हरे पत्तों से बनाई गई चटनी को भोजन के साथ प्रयुक्त करना चाहिए। ग्रीष्मकालीन दिन में तो एक बार अथवा दो बार नारियल के पानी का, गन्ने के रस का, बिल्व के शरबत का तथा नीरा इस नाम से प्रसिद्ध छोटी खजूर के फलों के रस का प्रयोग करना चाहिए इनमें से किसी एक या दो का ही प्रयोग करना ही समुचित है।

**कालेऽस्मिन् लवणाम्लकटूष्णान्यधिकञ्च व्यायामं विवर्जयेत्। यद्यपेक्षितं भवेत्तर्हि दिवा शीतगृहे स्वल्पकालात्मिकां निद्रां भजेदथवाऽरूक्षामन-भिष्यन्दिस्वरूपात्मिकामासीन-प्रचलायितरूपिणीं झपकीति ख्यातां तन्द्रामनुभवेदथवा चन्दनोदक-शीतलसंस्पर्शैः कूलराख्यैर्व्यजनैः सेव्यमानः स्वकार्ये निरतो भजेदास्याम्।**

इस ग्रीष्म काल में लवण, अम्ल, कटु ( चरपरे) एवं उष्ण द्रव्यों को तथा अत्यधिक व्यायाम को वर्जित कर देना चाहिए । यदि अपेक्षित हो (आवश्यकता हो) तो दिन में शीतल गृह में थोड़े समय के लिए निद्रा का सेवन करना चाहिए अथवा जो रूक्ष नहीं है तथा शरीर में अभिष्यन्द (चिपचिपापन) को उत्पन्न करने के स्वरूप वाली नहीं है ऐसी बैठे-बैठे ही शरीर को चलायमान करने के स्वरूप वाली 'झपकी' इस नाम से विख्यात तंद्रा (ऊँघ) का अनुभव किया (आनन्द लिया) जा सकता है अर्थात् कुछ काल तक झपकी ली जा सकती है अथवा चंदन के पानी से शीतल किए गए संस्पर्श वाले कूलर नाम के पंखों का सेवन करता हुआ, अपने कार्य में लगा हुआ व्यक्ति आसन ( कुर्सी अथवा गद्दी) का सेवन करे।

# संस्कृत-समाचाराः

जयपुरम्। स्वातन्त्र्यामृतमहोत्सवान्तर्गत कलासंस्कृतिविभाग-राजस्थान-संस्कृत-अकादम्योः संयुक्ततत्त्वावधाने आयोजितः **आदिशंकराचार्य-रामानुजाचार्यजयन्तीसमारोहः** मई मासस्य षड्तमे दिनांके अकादमीसंकुलसभागारे सम्पन्नः। समारोहे राजस्थानसर्वकारस्य कलासंस्कृतिविभागमंत्री डॉ.बुलाकीदासकल्लामहोदयैः सन्तपरम्पराया वैशिष्ट्यं वैश्विकदृष्टिकोणेन प्रतिपादितम्। उक्तं च समाज-व्यवस्थायां नवयुगसूत्रपातमाचार्याणां ध्येयमासीत्। तेषां ज्ञानभक्तिसाधनासिद्धान्ता अद्यापि प्रेरणाया अजस्रस्रोतांसि वर्तन्ते। वाराणसेयसंस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. **हरेरामत्रिपाठी** शांकर-अद्वैतवादस्य वैज्ञानिकतां प्रतिपादितवान्। लालबहादुरशास्त्रि-राष्ट्रीय-संस्कृत-विश्वविद्यालयस्य प्रो. **जयकान्तसिंहशर्मभिः** रामानुजाचार्यप्रतिपादित-विशिष्टाद्वैतस्य विश्लेषणं विहितम्। कलासंस्कृति-विभागीयः संयुक्तशासनसचिवः **पंकज ओझा** महोदयः आदिशंकराचार्य-रामानुजाचार्ययोः व्यक्तित्वस्य लोकोत्तरत्वं विज्ञापितवान्। राजस्थान-संस्कृत-अकादम्याः सचिवेन **संजयझाला** - महोदयेन सर्वेषामागन्तुकानां धन्यवादो विज्ञापितः।

---

**राजस्थान संस्कृत-अकादमीसंकुलसभागारे** 10.05.2022 तमे दिनाङ्के 'भारतस्य प्रथमस्वातन्त्र्यसंग्रामे राजस्थानस्यावदानम्' इति विषये विदुषां विचारगोष्ठी सम्पन्ना। विचारगोष्ठ्यां प्रो. **रमाकान्तपाण्डेयः**, जनसम्पर्क-अधिकारी श्री-**गोविन्दपारीकः**, वरिष्ठपत्रकारः श्री-**गुलाब बत्रा** च समुपातिष्ठन्। सर्वे राजस्थानक्रान्तिसन्दर्भाः प्रस्तुताः। संयुक्तशासनसचिवः श्री-**पंकज ओझाः** संगोष्ठीं समचालयत्, अकादमीनिदेशकः श्री-**सञ्जयझालाः** धन्यवादान् आर्पिपत्।

**- सुदामा शर्मा, प्रबन्धसम्पादकः**

---

संस्कृत-मास-पत्रिका **'भारती' एवं 'ई-संस्कृत-कुटुम्ब-यूट्यूब-चैनल'**-अनयोः संयुक्त-तत्त्वावधाने स्वातन्त्रताया अमृतमहोत्सवोपलक्ष्ये **75 अमर बलिदानी कथाः** 15 अगस्त 2023 दिनाङ्कं यावत् प्रत्येकं रविवासरे रात्रौ नव-वादने श्रावयिष्यन्ते। देशस्य विभिन्नराज्यानां स्वतन्त्रतासेनानिनां विभिन्नभाषासु प्रेरकप्रसंगाः प्रस्तोष्यन्ते। कार्यक्रमस्यास्य उद्घाटनसत्रं 29.05.2022 दिनाङ्के सम्पन्नम्, यस्मिन् भारतीयभाषाप्रोत्साहन-उच्चाधिकार-समितेः अध्यक्षाः श्रीमन्तः **कृष्णशास्त्री चमू**-महोदयाः मुख्यातिथिरूपेण, अथ च राष्ट्रीय-स्वयंसेवक-संघस्य अखिलभारतीय-प्रचारप्रमुखाः श्रीमन्तः **सुनील आम्बेकरमहोदयाः** मुख्यवक्ता-रूपेण संस्कृतभाषायाः महत्त्वम्, अथ च स्वतन्त्रतासंग्रामे संस्कृतस्य भूमिकाम्, संस्कृतेनैव राष्ट्रैक्यं विश्वशान्तिश्च सम्भवमिति महता समुद्घोषेण प्रतिपादितम्। 'भारती' पत्रिकायाः **सम्पादकः** प्रोफेसर-**श्रीकृष्णशर्मा** अतिथीनां श्रोतृणाञ्च स्वागतं व्याहरन् 'भारती' पत्रिकाया विकासयात्रां प्रास्तौत्। **डॉ.अभिनव उपाध्यायः** कार्यक्रमं समचालयत्। **श्रीगोपालझाः** वैदिकमंगलमादौ समाचरितवान्।

**- डॉ. अभिनव उपाध्यायः**



प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्पलेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

## राष्ट्रीय विचारों के लिए पढ़ें

पाञ्चजन्य साप्ताहिक



ORGANISER Weekly



हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा

You can subscribe पाञ्चजन्य / ORGANISER weeklies online through our
Website : panchjanya.com, organiser.org

| वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1000 (साधारण डाक द्वारा) | ORGANISER ₹1000 (by ordinary post) | विदेशों में $80 (विदेशों में हवाई डाक द्वारा) |
|---|---|---|---|

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

### भारत प्रकाशन (दिल्ली) लिमिटेड

द एड्रेस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई-मेल : advt@bpdl.in

विज्ञापन विभाग सम्पर्क सूत्र :- 700-9696-708, 014-2222-014

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७१०१४

प्रतिष्ठायाम्,